॥ ओ३म् ॥
एषा कापुरुषा सेव्या
धीराणां नैव पद्धतिः।
यदायासलवत्रासात्
सौख्यवैमुख्यभागिता ॥
( राजतरङ्गिणी - 8/2822 )

औचित्यप्रच्युताचारो
युक्त्वा स्वार्थं न साधयेत्
व्याजवालिवधेनैव
रामकीर्तिः कलंकिता
( चारुचर्या - 51 )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.:
4-5, 19-20 of Every Month
सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत-संवादः

पाक्षिकं समाचारपत्रम्
संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
सर्वलक्षणहीनोऽपि
यः सदाचारवान्नरः
श्रद्धानोऽनसूयश्च
शतं वर्षाणि जीवति
( मनुस्मृति - 4/158 )

न मर्षयन्ति चात्मानं
सम्भावयितुमात्मना। आदर्शयित्वा
शूरास्तु कर्म कुर्वन्ति दुष्करम्॥
( वा. रामायण, युद्धकाण्ड - 65/4 )

卐 वर्षम्-१३ 卐 अंकः-१८ ( ३०६ ) नवदेहली 卐 १६ मार्चमासः २०२४तः ३१ मार्चमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

### केंद्रीयसंस्कृतविश्वविद्यालयस्य प्रथमः दीक्षांतसमारोहः समायोजितः

## भारतस्य संस्कृतिः अस्मत् पारंपरिक सांस्कृतिक-आध्यात्मिकज्ञानस्य प्रतीकः-राष्ट्रपतिः द्रौपदीमुर्मूः



नवदेहली। (सुरभिः) केंद्रीयसंस्कृतविद्यालय नई दिल्ली इत्यनेन दीक्षांतसमारोहः महता उत्साहेन समाचरितः तत्र कुलपतिः प्रो श्रीनिवासवरखेड़ी सम्मानित अतिथीनां, संकाय सदस्यानां स्नातकच्छात्राणां कृते हार्दिक शुभकामनाः प्रदत्तवान्। मुख्यातिथिः भारतस्य माननीय राष्ट्रपति द्रौपदीमुर्मुः स्व प्रेरक दीक्षांतभाषणे कथितवती यत् ''अस्मद् राष्ट्रियन्यासस्य पारंपरिक ज्ञाने संस्कृतम् आध्यात्मिकज्ञानस्य प्रतीकरूपेण अवतिष्ठते यथा हि वेदेषु रामायणे च प्रतिबिंबितं भवति । 2020 शिक्षा नीतिरपि संस्कृतंकेंद्रीकृत्यभाषात्मकस्य अन्वेषणस्य पुनर्जागरणं प्रारभते ।'' केंद्रीयसंस्कृतविश्वविद्यालयस्य कुलाधिपतिना शिक्षामंत्रिणा श्रीधर्मेंद्रप्रधानेन भाषितं

शेषभागःद्वितीयेपुटे




## आचरणस्य पवित्रता समाजसेवा च जीवनस्य प्रमुखं लक्ष्यम्-डॉ. मणिभद्रः

### पतंजलि मानवसेवायां, समाजसेवायां राष्ट्रसेवायां च संलग्नं संस्थानम्- आचार्योबालकृष्णः

हरिद्वारम। राष्ट्रसन्तप्रवरः, नेपालकेसरी डॉ. मणिभद्रः अद्य पतंजलियोगपीठे प्राप्तः । महामंत्रीआचार्य बालकृष्णः तं मुख्यद्वारे भव्यतया स्वागतीकृतवान्। अवसरेस्मिन् जैन मुनिरकथयत् यत् आचरणपवित्रता



समाजसेवा च जीवनस्य प्रमुखं लक्ष्यम् । रोगिभ्यः आरोग्य प्रदानं महती सेवा विद्यते। स्वामीरामदेवस्य आचार्यबालकृष्णस्य च नेतृत्वे पतंजलिसंस्थानं स्वास्थ्यगत सेवाः प्रदाय कर देशस्य समाजस्य च समक्षं समाजसेवायाः उत्कृष्टम् उदाहरणं प्रस्तुतवन्तौ।

अवसरेस्मिन् आचार्यबालकृष्णः डॉ. मणिभद्राय पतंजलेः विविध सेवापरक गतिविधीनां विस्तृतं विवरणं सूचितवान्। आचार्येण कथितं रुग्णस्य चिकित्सायै पतंजलिः कस्याश्चिद् प्रणाल्याः विरोधं न कुरु ते रोगिणो हितं सर्वोपरि। पतंजलेरभियानं सेवा पर्यायः तद्भवतुमानव सेवा, समाज सेवा राष्ट्र सेवा वा। अद्य पतंजलिः शिक्षा, चिकित्सा, स्वदेशी, सूचना तकनीकी, योग-आयुर्वेद अनुसंधानं, कृषि अनुसंधानं, गौ-संरक्षणं संवर्द्धनम् उद्योगम् इत्येषु क्षेत्रेषु स्व सेवानां विस्तारेण प्रददाति सममेव भारतीय मूल्यानां, परम्पराणां संस्कृतेश्च उत्थाने महतीं भूमिकां निर्वहति।

## 'भारत की आवाज-आचार्यरमाकान्तशुक्ल' इति चलचित्रस्य लोकार्पणम्, प्रेक्षागृहं दर्शकाकुलम्

-निधिः तिवारी

नवदेहली। 10 मार्च 2024 तमे दिनाङ्के रविवासरे सायं 6:30 वादने दिल्लीस्थे 'एलाइंस फ्रांसीसी लोधी एस्टेट इत्यत्र प्रेक्षागृहे 'भारत की आवाज - आचार्य रमाकान्त शुक्ल' इति चलचित्रं लोकायार्पितम् । चलचित्रस्यास्य निर्देशिका बीनूराजपूतः, निर्माता प्रस्तोता च ऋषिराजपाठकः वर्तेते । चलचित्रेऽस्मिन् आधुनिकसंस्कृतसाहित्यस्य लोकप्रियकवेः आचार्य-रमाकान्तशुक्लस्य जीवनवृत्तं तत्संस्कृतसेवाश्चाभिलक्ष्य





तत्कथा प्रस्तुता। अस्मिन् आचार्य-राधावल्लभत्रिपाठिवर्यस्य, आचार्यस्य अभिराजराजेन्द्र-मिश्रवर्यस्य ऋषिराजपाठकस्य च वक्तव्यैः सह आचार्य-रमाकान्तशुक्लस्य परिवारजनानां वक्तव्यानि च सन्ति। अत्र आचार्यरमाकान्तशुक्लस्यापि वक्तव्यानि सन्ति। चलचित्रान्ते ऋषिराजपाठकेन प्रगीतस्य आचार्यरमाकान्तशुक्लकृतस्य 'भाति मे भारतम्' इति काव्यस्य शोभाध ायकत्वं सर्वातिशायि। कार्यक्रमस्यादौ निधितिवारी प्रियाझा च ऋग्वेदीयमग्निसूक्तमपठताम्। तदनु अतिथिभिः कृतं दीपप्रज्वलनं सरस्वतीसमर्चनं पुष्पोपहारैः, आचार्यरमाकान्तशुक्लचित्रपूजा च। एतदनु डॉ. चन्द्रमौलिशुक्लः ,श्रीमदानन्दवर्द्धनशुक्लः, डॉ. अभिनवशुक्लः, डॉ. ऋषिराजपाठकः, श्रीमती अनीताशुक्ला, श्रीमती रीनाशुक्ला च आचार्यराध ावल्लभत्रिपाठिनां आचार्याणाम् ओमनाथबिमलीवर्याणाम् , निर्देशिकायाः बीनूराजपूत इत्यस्याः, संगीतनिर्देशकस्य श्रीमतः सिद्धार्थदासस्य च स्वागतमकार्षुः । तदनु चलचित्रपत्रकलोकार्पणपुरस्सरम् ऋषिराजपाठकेन चलचित्रनिर्माणपूर्वपीठिका सम्यगुद्घुष्टा। तेनाभाणि यद् 8 मई 2022 तमे दिनाङ्के तस्य ऋषिराजपाठकस्य गृहे आचार्यरमाकान्तशुक्लानां दृश्याङ्कघ्नमभूत् 11 मई 2022 तमे च दिनाङ्के ते दिवं प्रयाताः । तेनोदीरितं यत् एतच्चलचित्रलोकार्पणं गुरुशिष्यपरम्पराक्रमे लघु श्रद्धाञ्जलिरूपम्।

ऋषिराजपाठकस्य भावुकप्रास्ताविकप्रस्तावानन्तरं लघुचलचित्रं प्रदर्शितम्। लघुचलचित्रं सर्वानपि दर्शकान्

शेषभागःअष्टमपुटे

# दीक्षान्तसमारोहे विद्यावारिधिः इत्युपाधिना सभाजितः डॉ. रत्नेशत्रिवेदीवर्याः

आचार्यदीनदयालशुक्लः

केन्द्रीयसंस्कृतविश्वविद्यालयेन आयोजिते प्रथमे दीक्षांतसमारोहे देशस्य यशस्वी राष्ट्रपतिना महामहिमश्रीमतीद्रौपदीमुर्मूवर्यया शिक्षामन्त्रिणः श्री




धर्मेन्द्रप्रधानः, विश्वविद्यालयस्य कुलपतिः श्रीनिवासवारखेडी च विभिन्नैः शोधकर्तृभ्यः उपाधिधारकेभ्यः उपाधिं प्रदत्तवन्तः। नवीदिल्लीनगरे आयोजिते दीक्षांतसमारोहे विभिन्नपरिसरस्य छात्राणां कृते उपाधिः प्रदत्ता यस्मिन् बाँदामण्डलस्य लखनऊपरिसरस्य शोधविद्वान् डॉ. रत्नेशत्रिवेदी इत्यस्मै विद्यावरीधिपदवी अपि प्रदत्ता। उल्लेखनीयं यत् डॉ. रत्नेशत्रिवेदी स्वगृहमण्डलात् बांदातः प्राथमिकशिक्षां प्राप्य उच्चशिक्षां प्राप्तवान् । तत्र सः स्नातकपदवीं, स्नातकोत्तरपदवीं च प्राप्तवान्, तदनन्तरं केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरतः संस्कृते अध्ययनं कृतवान् । तस्य शोधस्य विषयः व्याकरणम् आसीत् येन सम्पूर्ण संस्कृतजगत् लाभं प्राप्नुयात् । अस्य शोधस्य माध्यमेन समाजाय अनेकानि६६ नवीनतथ्यानि उपलभ्यन्ते। भवद्भ्यः कथयामः यत् डॉ. रत्नेश त्रिवेदी सम्प्रति बाँदामण्डलस्य श्री वामदेव संस्कृतमहाविद्यालये व्याकरणविभागप्रमुखत्वेन कार्यं कुर्वन् अस्ति। विभिन्नेषु सामाजिकसंस्थासु स्वदायित्वं निर्वहन् सः संस्कृतभारतीसङ्गठनस्य चित्रकूटमण्डलस्य विभागसमन्वयकरूपेण कार्यं कुर्वन् अस्ति । सः उत्तरप्रदेशसंस्कृतसंस्थानस्य सदस्यः अपि भूत्वा विविधप्रकारपुरस्कारान् प्राप्य अनेकानि शोधपत्राणि प्रकाशयित्वा संस्कृतजगति संस्कृतस्य विशिष्टविद्वान् इति प्रसिद्धः अस्ति ।

# मूलचन्द्रशुक्लः देहल्यां केन्द्रीय-संस्कृतविश्वविद्यालयद्वारा 'विद्यावारिधिः' इत्युपाधिना विभूषितः

रामनगरम्/देहरादूनम्(कुलदीप मैन्दोला)। मूलचन्द्र- शुक्लाय नवदेहलीस्थ-केन्द्रीय-संस्कृत-विश्वविद्यालयद्वारा दीक्षान्तसमारोहे यशोभूमि कनवेन्शन सेण्टर,दिल्ली इत्यत्र कार्यक्रमस्थले विद्यावारिधिः(Ph.D.) इत्युपाधिः प्रदत्ता। अत्र मुख्यातिथित्वं




महामहिम-राष्ट्रपतिना द्रौपदी मुर्मू महोदयया आध्यक्ष्यं कुलाधिपतिना शिक्षामन्त्रि-भारतसर्वकारेण धर्मेन्द्र प्रधान महोदयेन आतिथेयश्च कुलपतिना प्रोफे. श्रीनिवासः वरखेडी महोदयेन निर्व्यूढः। डॉ. मूलचन्द्रशुक्लः केन्द्रीय-संस्कृत- विश्वविद्यालयस्य गङ्गानाथझा परिसरः,प्रयागराजः इत्यस्य निदेशकः, प्रोफेसर ललित कुमार त्रिपाठी महोदयस्य निर्देशने 'समकालिक-1970 तः संस्कृतगीतिकाव्यानां भाषाभावयोर्वैशिष्ट्यानुशीलनम्' इति संस्कृतविषये शोधकार्यं पूर्ण कृतवान् । अनेन अस्मिन् शोधकार्ये 1970 तः अद्यावधि संस्कृतस्य गीतविधायां लिखित-रचनानां साहित्यव्याकरणयोः दृष्ट्या उभयोः वैशिष्ट्यम् अनुशीलनञ्च बृहद् शोधकार्यं प्रस्तुतम्। अवबोधयन् वच्मि यत् डॉ. शुक्लः चित्रकूट-जनपदस्य बरगढ-पत्रालयस्य गाहुर-ग्रामस्य च वास्तव्यो वरीवर्ति।अस्य पिता साधूशरण शुक्लः कृषको विद्यते। अस्य त्रिषु पुत्रेषु ज्येष्ठपुत्रः प्रदीपशुक्लः प्राध्यापकः,लघुपुत्रः नरेन्द्र शुक्लः मध्यमपुत्रश्च मूलचन्द्र शुक्लः 2014 तमे वर्षे उत्तराखण्ड-लोक-सेवा-आयोगद्वारा असिस्टेंट प्रोफेसर संस्कृतम् इत्यस्मिन् पदे चयनितो जातः । वर्तमानसमये वरिष्ठ- असि. प्रोफेसर संस्कृत-विषये उत्तराखण्डस्य नैनीतालजनपदस्थ- पीएनजी राजकीय-स्नातकोत्तर- -महाविद्यालय-रामनगरम् इत्यत्र कार्यरतो विद्यते।अनेन स्वसफलतायाः श्रेयो माता- पितृभ्यां,गुरुजनेभ्यः, भ्रातृभ्यः, भार्यायै च इत्यादिभ्यः प्रदत्तः। पीएचडी इत्युपाधिप्राप्त्यर्थं कार्यस्थलस्य नैकजनैः सह प्राचार्यः प्रोफेसर एम.सी.पाण्डे महोदयः देशस्य विविधजनैः सह सम्बन्धि-पारिवारिक-ग्रामीणजनाश्च सहर्षं शुभकामनाः प्रेषितवन्तः।

# संस्काराणाम् आधारशिला संस्कृत - डॉ. मनीषाशर्मा

## (सरलमानकसंस्कृतकार्यशाला समायोजिता)

जयपुरम् । राजस्थानशिक्षकप्रशिक्षणविद्यापीठे शाहपुरा-बाग-आमेर मार्ग- जयपुरे 15/ 3 /2024 ते दिनांके केंद्रीयसंस्कृतविश्वविद्यालयस्य राजस्थानशिक्षकप्रशिक्षणविद्यापीठ शाहपुरा बाग, जयपुरस्य च संयुक्ततत्वाधाने एकदिवसीयकार्यशाला 'सरल मानक संस्कृतम्' इति आयोजिता । विद्यापीठ प्राचार्यः डॉ. मनीषाशर्मा कथितवान् यदस्माकं शरीरं द्विविधं भौतिकं सूक्ष्मं च । यत्र भौतिक शरीराय नित्य क्रिया भवति । संस्थानस्य अध्यक्ष श्री बृजकिशोरशर्मा संस्कृत संस्कृत्या सह योजनम् आजीविकोन्मुखिनीं निर्मातुं परामृष्टवान्। संयोजकः डॉ डम्बरूधरपतिः, समन्वयकः डॉ रेखाशर्मा च संस्कृतस्य सरलं एवं च मानकं स्वरूपं पर चर्चितवन्तौ सर्वेभ्यः प्रतिभागिभ्यः



कथितवान् यत् देवी अर्चनेन समं कार्यशालोद्घाटन सत्रे संस्थान सचिवः डॉ. राजकुमारजोशी संस्कृत भाषाम् उन्नेतुं केंद्र-राज्य सर्वकार द्वारा विहितं संस्कृत भाषाविषयकं सहयोगम् उक्तवान्। केंद्रीयसंस्कृतविश्वविद्यालय जयपुरपरिसरतः प्राप्तेन संयोजकेन डॉ डम्बरूधरपतिना भारतीयैः आध्यात्मिकतां परित्यज्य छ पाश्चात्य संस्कृतिः अंगीकारः अथ च तेषां पलायन विषयः इत्युभयं समाधृत्य चिंता व्यक्ता। संस्कृतविभागस्य संयुक्तनिदेशकः श्री सत्यनारायणशर्मा प्रायोगिकम् अभ्यासं कारितवन्तः। शिक्षाशास्त्र विभागाध्यक्षः डॉ सुभद्राजोशी संस्कृतगीत माध्यमेन संस्कृतभाषास्वरूपं सरलतम् अभिव्यक्तवान् यद् वर्तमाने अस्माकं देशे संस्कृत भाषायाः दशां व्यक्तीकरोतीति। अन्ते विद्यापीठप्राचार्या डॉ. मनीषाशर्मा उपस्थितेभ्यः समस्तेभ्यः अतिथिभ्यो, व्याख्यातृभ्यः प्रशिक्षणार्थिभ्यो धन्यवादं ज्ञापितवती । कार्यशालायामस्याम् उपस्थितेभ्यः समस्तप्रतिभागिभ्यः प्रमाण पत्राणां, पाठ्यसामग्रीणां च वितरणं विहितम् ।

# केंद्रीयसंस्कृतविश्वविद्यालयस्य मुंबादेवीआदर्शसंस्कृतमहाविद्यालयस्य च संयुक्त तत्वाधाने पञ्चदिवसीय पांडुलिपिशास्त्रध्ययन राष्ट्रियकार्यशाला आयोजिता

जयपुरम्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे कार्यशालोद्घाटने विश्वविद्यालय व्याकरणविद्याशाखा जयपुर परिसरेण



मुम्बादेवी आदर्श संस्कृत महाविद्यालय मुंबई इत्यनेन च संयुक्ततत्त्वावधाने नूतन भवन स्थितायां संवादशालायाम् उद्घाटनकार्यक्रमे मुख्यअतिथि रूपेण जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो रामसेवकदुबे कथितवान् पांडुलिपिसंरक्षणाय तदीयसंपादनस्य लिपीनां ज्ञानम् अत्यन्तम् आवश्यकम्। इयं कार्यशाला पांडुलिपीनां ज्ञानस्य अत्यन्तम् उपकारिणी भविष्यति। सारस्वतअतिथिरूपेण शिक्षाशास्त्रविद्याशाखायाः अध्यक्षः प्रो वाई. एस.रमेशः कथितवान् शास्त्र ज्ञानाय लिपि ज्ञानम् अत्यन्तम् आवश्यकम्। पाण्डुलिपयः शारदा, ग्रन्थ इत्यादि लिपिषुबद्ध संपादनाय अध्ययनम् अत्यन्तम् आवश्यकम्। कार्यशालायाः अध्यक्षरूपेण परिसर निदेशकः प्रो सुदेशकुमारशर्मा कथितवान् यन्मातृकाणां (स्वराणां) संपादनम् अध्ययनं च कार्यशाला माध्यमेन सर्वे शोधकर्तारो निश्चितमेव लाभान्विताः भविष्यन्ति। परिसरे अनेकेन प्रकारेण विषय प्रकाशनाय अनेकाः कार्यशालाः आयोज्यन्ते यन्माध्यमेन अनेके शोधकर्तारो विषयेषु निपुणतां प्राप्नुवन्ति। समन्वयकः प्रो विष्णुकान्तपाण्डेयः कार्यशालायाम् उपस्थितानां समेषाम् अतिथीनां स्वागतं कृतम्। संयोजकः डॉ कार्तिकभागवतः कार्यशालायाः स्वरूपाणाम् उद्देश्यानां च विषये प्रतिभागिनः संबोधयन् उक्तवान् यत् पाण्डुलिपि कार्यशाला निश्चितमेव सर्वेभ्योऽभ्यर्थिभ्यः उपकारिका भविष्यति। सञ्चालनं व्याकरणविभागस्य सहायकाचार्या डॉ.मोनिका बोल्ला अकरोत्। अन्ते धन्यवाद ज्ञापनं श्री नरेशसिंहः कृतवान्। कार्यशाला इयं 18 मार्चदिनाङ्कतं यावच्चलिष्यति। तत्र भारतस्य प्रसिद्धाः पाण्डुलिपिविदः अध्यापनं कारयिष्यन्ति।

प्रथमपुटस्य शेषभागः

# भारतस्य संस्कृतिः अस्मत्...

यत् भारतीय संस्कृतौ संस्कृत भाषायाः समृद्ध न्यासं वर्धके संरक्षके आंदोलने केंद्रीय संस्कृत विश्वविद्यालयः इव संस्थानानां समर्थने प्रधान मंत्रिणो नरेंद्र मोदिनः प्रयासान् प्रशंसितवान्। समारोहस्य अध्यक्षता कुर्वता कुलाधिपतिना श्रीमता प्रधानेन स्नातकच् छात्राणां उज्ज्वलं भविष्यं प्रति बलं ददता, ऐतिहासिके प्रथमे दीक्षांतसमारोहे सहभागितया गर्वं व्यक्तीकृतवान्। दीक्षांतसमारोहोऽयं स्नातकच्छात्राणां महत्परिश्रमं, समर्पणम्, उपलब्धिं च परिचेतुम् एकेन मंच रूपेण कार्यं कुरुते, येन पूर्णस्य केंद्रीय संस्कृत विश्वविद्यालय समुदायस्य मध्ये गर्वस्य उपलब्धेश्च भावना उपद्यते । पञ्चविद्यार्थिनः स्वर्णपदकेन सम्मानिताः । समारोहे आहत्य 3000 छात्राः उपाधिभिस्सम्मानिताः।



# अनुसन्धानमेव समस्तप्रश्नानां जिज्ञासानाञ्च समाधानमस्ति : प्रो.गिरीश्वरमिश्रः

भारतीयज्ञानपरम्परायां अनुसन्धानस्य विविधाः आयामाः सन्ति । अनुसन्धानेन साहित्यिकसामाजिकसमस्यायाः समाधानं कर्तुं शक्यते । सामाजिक-व्यावहारिक-राजनैतिक-समस्यानां निराकरणाय संस्कृतशास्त्राणि रच्यन्ते स्म । आधुनिककाले अनुसन्धानपद्धतिः प्राचीनसंशोधनात्



किञ्चित् भिन्ना अस्ति । प्राचीनकाले कस्यापि ग्रन्थस्याधारेण कृताः भाष्य-टीका-वृत्तिः इत्यादयः ऋषीणां सूक्ष्मानुसन्धानस्य परिणाम एव सन्ति। कार्यशालायां मुख्यातिथिरूपेण समागताः महात्मागाँधी-अन्ताराष्ट्रीयहिन्दीविश्वविद्यालयस्य पूर्वकुलपतयः प्रो.गिरीश्वरमिश्रवर्याः शोधच्छात्रान् निर्दिष्टवन्तः। विश्वविद्यालयस्य कुलपतयः प्रो.मुरलीमनोहरपाठकमहाभागाः अनुसन्धानपद्धतिं सरलरूपेणोपस्थितं कृतवन्तः। शोधविभागस्य प्रमुखाः प्रो.शिवशङ्करमिश्रवर्याः शोधस्य ऐतिहासिकं स्वरूपं व्याख्याय भारतीयज्ञानपरम्परया सह शोधस्य पुरातनः सम्बन्धः अस्ति इति उक्तवान्। अनेकानि अनुसन्धानतथ्यानि वेदेषु प्राप्यन्ते। शोधप्रविध्या एव शोधकार्यं प्रभावोत्पादकं भवति।

इयं कार्यशाला नवदेहलीस्थ श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शोधविभाग एवं दिल्लीसंस्कृतअकादमी इत्यनयोः संयुक्ततत्त्वावधाने 04.03.2024 तमे दिनाङ्के आयोजिता जाता। अस्यां कार्यशालायां श्रीलालबहादुरशास्त्रीराष्ट्रियविश्वविद्यालयस्य, जवाहरलालनेहरुविश्वविद्यालयस्य, दिल्लीविश्वविद्यालयस्य जामियामिल्लियाइस्लामियायाश्च शोध च्छात्राः समुपस्थिता आसन्। तत्र शोधच्छात्राणां अनुसन्धानसम्बद्धप्रश्नानां समाधानं जातम्। अवसरेऽस्मिन् दिल्लीसंस्कृतअकादम्याः एवं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य आचार्याः, अधिकारिणः कर्मचारिणश्च समुपस्थिता आसन्।

# संस्कृताध्ययनेन शास्त्राणामभ्यसनं सहजम् - डॉ. नवलता

लखनऊ - उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चाल्यमाने नवदिनव्यापिनि आवासीये वर्गे अद्यतने षष्ठे सत्रे वक्त्रीरूपेण समागतया संस्कृतविदुष्या डॉ नवलतया प्रेरणात्मकवचोभिः प्राचीनकाले भारते संस्कृतस्य किं स्वरूपम् आसीदिति विषयं स्वीकृत्य सप्तचत्वारिंशप्रशिक्षूणां मार्गदर्शनं कृतं यत्




षोडशसंस्काराणाम् उल्लेखः संस्कृते निहितः। अस्याध्ययनेन वेदशास्त्राणाम् अभ्यसनं सहजया शक्यम् । श्रेष्ठं विश्वं विनिर्मातुं , विश्वबन्धुत्वं प्रतिष्ठापयितुं च संस्कृतं स्वीयं विविष्टं महत्वं भजते। अमुष्याः विदुष्याः परिचयेन सह स्वागतं प्रशासनिकाधिकारी डॉ जगदानन्दझाः अकरोत् । प्रशिक्षणप्रमुखः सुधिष्ठमिश्रः प्रास्ताविकं प्रस्तूय समागतायै वक्त्र्यै विषयोपस्थापनम् अकरोत्। मञ्चे समन्वयकः दिव्यरञ्जनः च समुपविष्टाः आसन्। अवसरेऽस्मिन् प्रशिक्षकेषु डॉ स्तुतिगोस्वामी, डॉ श्वेतावरनवालः, राधाशर्मा, धनञ्जयमिश्रः, सचिनशर्मा, भाषाविशेषज्ञो विमलेश मिश्रश्च आसन्। समन्वयकेन अनिलगौतमेन वक्त्रीमहोदयायै सादरं धन्यवादश्च व्याहृतः।

# मनः पूतं करोति संस्कृतमिदं - जनविचारः

वार्ताहरः शशिकान्तः




मार्चमासे उत्तरप्रदेशसंस्कृतसंस्थालखनऊद्वारा २०२४ संस्कृतभाषाशिक्षणकक्षासु मनः पूतं कुर्वतीं वेदवाणीं शिक्षितुम् अतीव संस्कतानन्दः वर्तते सर्वत्र परीक्षामासे तनावमुक्तं करोति संस्कृतम् । प्रारम्भे नीतया संस्थानगीतिकानन्तरं प्रियङ्कया महोदयया सरस्वतीवन्दना विहिता। नूतनसत्रेऽस्मिन् संस्कृतभाषाशिक्षणकक्षायां प्रशिक्षुभिः संस्कृतसूक्ष्मताः ज्ञाताः । पत्रिकापठनार्थ, मित्रालापार्थ, गीतापठनपाठनार्थं, परीक्षार्थं, सम्भाषणार्थञ्च इतोऽपि पृथक् पृथक् उद्देश्यं सफलीकर्तुं प्रशिक्षवः समागताः। उपक्रमोऽयं बहुमोदमानोऽस्ति।

आधुनिककाले संस्कृतभाषायाः उपयोगिता: उक्त्वा शास्त्रसंरक्षणे संस्कृतस्य मुख्यभूमिका प्रस्तावितासीत्। भाषाविज्ञानानुसारं संस्कृतस्य महत्त्वमुक्तम्। जिलागाजियाबादस्य संस्थानप्रशिक्षक शशिकांत महोदयेन कक्षैषा संचाल्यते । द्वितीयस्तरस्य कक्षैषा सायं ०८:००तः ०९:०० वादनपर्यन्तं प्रचलति। शशिकान्त महोदयः प्रशिक्षून् वर्णमालाज्ञानं, संस्कृतस्य सूक्ष्मतां च पाठितवान्। कक्षायामुपस्थितेषु कविता,नीति, किरण, मेधा, मेघा,निश्चला,पंकज,सन्तोष इत्यादिभिः प्रशिक्षुभिः स्वविचाराः प्रकटिताः। प्रतिभागिभ्यः धन्यवादं दत्वा प्रशिक्षणसंयोजकः श्री धीरज मैठाणी संस्थायाः योजनायाः विषये विस्तरेण उक्तवान् । सः अवदत् यत् प्रतिमासं २ तः ३ सहस्रं छात्राः संस्कृतभाषां शिक्षन्ते। एताः कक्षाः उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशकः विनयश्रीवास्तवः, प्रधानपदाधिकारी डॉ. दिनेशमिश्रः, सर्वेक्षिका डॉ. चन्द्रकला शाक्यः, प्रशिक्षणप्रमुखः सुधिष्ठ मिश्रः, कक्षानिरीक्षणं समन्वयक दिव्य रंजनः राधा शर्मा च कृतवन्तः। ऑनलाइन माध्यमद्वारा संचालितकक्षायामन्ते कक्षान्ते प्रतिदिनं प्रतिभाप्रदर्शनमपि भवति च । अत्र ५० छात्रैः सह, संस्थायाः पदाधिकारिणः:छाया, गीता, रागनी, पूनम, वीरेन्द्र, बीनया, इत्यादयः उपस्थिताः आसन्।

एतासु कक्षासु अन्ते परीक्षा अपि भविष्यति । उत्तीर्णवद्भ्यः प्रमाणपत्राणाम् वितरणस्य व्यवस्थापि अस्ति।

एतावता बहवः उपकृताः। विशेषतः ये विद्यालयादिषु TGT/PGT इत्यनयोः कृते सज्जतां कुर्वन्ति, तेऽप्यत्र पठितुमागच्छन्ति । एतया योजनया अग्रेऽपि उपकृताः भविष्यन्ति एव । ये एतां निःशुल्क-कक्षामागन्तुकामाः ते जनाः

“sanskritsambhashan.com” इति लिंक उद्घाट्य तत्र स्वानुकूलतया समयं चित्वा स्वस्य नामांकनं कृत्वा संस्कृतं शिक्षन्ते । ये प्रथमस्तरं पठितवन्तः विशेषतः तेभ्यः अन्येभ्यश्च द्वितीयस्तरस्य प्रशिक्षणमपि संस्थानेन दीयते। परीक्षायाम् ३३% उत्तीर्णवद्भ्यः शिक्षार्थिभ्यः ७५% उपस्थितेभ्यः प्रशिक्षुभ्यः प्रमाणपत्राणि अपि दूरवाणीसन्देशमाध्यमेन प्रेषणव्यवस्था अस्ति। मासे अस्मिन् द्विचत्वारिंशत् कक्षाः प्रचलन्ति यासु प्रायः द्विसहस्राधिक-छात्राः संस्कृतज्ञानाय आगच्छन्ति । संस्थानद्वारा अधुना गृहे-गृहे संस्कृतम् इत्यनया योजनयापि प्रचारः भवति ।

# गृहे-गृहे संस्कृतं भविष्यति सम्पूर्णउत्तरप्रदेशे

- सचिन शर्मा, मोदीनगरम्, गाजियाबादम् उ.प्र.

उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चालिता ‘गृहे-गृहे संस्कृतम्’ इति योजनान्तर्गते आवासीयं सरलसंस्कृतभाषाशिक्षकप्रशिक्षणस्य वर्गस्य मार्चमासस्य ११ दिनाङ्के उद्घाटनं जातम्। अस्य




वर्गस्य उद्घाटनसत्रे वाग्देव्याः सरस्वतीमातुः पुरतः दीपं प्रज्वाल्य मालाम् अर्पयित्वा च बभूव। उद्घाटनसत्रे मुख्यातिथिरूपेण चन्द्रकान्तशुक्लवर्यः जगदानन्दझावर्यः रामसुमेरवर्यः च इत्यादयः अतिथयः उपस्थिताः आसन्। संस्थानस्य निदेशकः विनय श्रीवास्तववर्यः स्वोद्बोधने उक्तवान् यत् अनया योजनया प्रतिगृहं संस्कृतगृहं भविष्यति इति उक्त्वा अस्य वर्गस्य कृते शुभकामनाः अददत्। सत्रस्य विषयः आसीत् - समाजस्य हितं संस्कृते निहितम् । इमं विषयं स्वीकृत्य चन्द्रकान्तशुक्लमहोदयेन उक्तम् यत् वास्तविकतायां समाजस्य हितं संस्कृते एव निहितं वर्तते , अस्मिन् नास्ति कौपि संशयः। भवन्तः इतः गत्वा समाजे संस्कृतं पाठयित्वा समाजस्य हितं निश्चयेन करिष्यन्ति इति बहु किमपि महोदयेन उक्तम्। श्रीरामसुमेरवर्यः शुभकामनाः दत्वा वर्गस्य सफलतायै आशीर्वादं दत्तवान् उक्तवान् च संस्कृतकार्यं दैवीयकार्यं वर्तते अतः अस्माभिः इदं कार्यम् उत्तमतया संपादनीयम् । इतौपि वर्गे प्रशिक्षणप्रमुखः सुधिष्ठकुमारमिश्रवर्येण उक्तं यत् कथं प्रशिक्षणं प्राप्तव्यम् , कथं विद्यालयेषु गत्वा बालकान् पाठयामः इत्यादि। शिक्षकरूपेण अत्र दिव्यरञ्जनवर्यः , राधाशर्मा , सचिन शर्मा, धनञ्जयमिश्रः , श्वेता बरनवालः, स्तुतिः गोस्वामी , विमलेशमिश्रः च उपस्थिताः सन्ति । सम्पूर्णवर्गे ये जनाः प्रशिक्षणं प्राप्नुवन्ति ते आहत्य ५२ जनाः सन्ति।

# सम्पादकीयम्

सम्मानिताः सुजनाः!

सादरं नमोनमः।

होली भारतस्य एकः विशिष्टः सांस्कृतिकः आध्यात्मिकश्च महोत्सवः । अध्यात्मं नाम मनुष्यस्य ईश्वरेण संबद्धता अथ च स्वस्यैव स्वेन सह संबद्धता। अतः एव होली मानवस्य परमात्मना सह अथवा स्वेन सह साक्षात्कारो होली । वर्णाः न केवलं प्रकृतौ चित्रेषु चौव न भवन्ति अपितु अस्माकम् आंतरिक्याम् ऊर्जायामपि भवन्ति, यद्धि अस्माभिः आभामंडलं कथ्यतेस अस्मज्जीवने वर्णानां गहनः प्रभावः भवति , वयं चिन्तनमपि वर्णानां सहयोगेनैव कुर्मः । गतिरपि वर्णानां सहयोगेनैव। आभामंडलं, यत् सर्वाधिकं शक्तिशालि भवति तदपि वर्णानामेव अनुकृतिः। होली महोत्सवस्य अवसरः अध्यात्मना सम्बद्धजनेभ्यः आधिक्येन उपयोगी महत्वपूर्णश्च, यतः अध्यात्मनो योगस्य च विशेषज्ञाः विभिन्नवर्णान् ध्यात्वा साधनायां तान् उपयुज्य आभामंडलं सशक्तीकुर्वन्ति। अनेन प्रकारेण होली आमोद-प्रमोदस्यैव न अपितु अध्यात्मनोऽनुपमं पर्व ।

होली महोत्सवः तेन च संबद्ध बसंत ऋतुः उभावपि पुरुषार्थस्य प्रतीकौ। पादपाः अपि अस्मिन् ऋतौ नूतन परिधानं धरन्ति। बसंतः नाम नूतनः । नूतनः उत्साहः, नूतना आशा, नूतनोल्लासः नूतना प्रेरणा- एते बसंततो महत्वपूर्णानि अवदानानि।

होली आध्यात्मिक वर्णैः क्रीडितुम् एक पूर्ण प्रक्रिया आचार्येण महाप्रज्ञेन प्रणितायां प्रेक्षाध्यान पद्धतौ उपलब्धा । अस्य प्रेक्षाध्यानस्य अंतर्गतं लेश्या ध्यानं कार्यते, यत् वर्णानां ध्यानं विद्यते।

लेश्या ध्यानं नाम वर्णानां ध्यानम्। अत्र वयं निश्चित वर्णान् निश्चित्य चौतन्य-केंद्रे द्रष्टुं प्रयत्नं कुर्मः। वर्णानां साक्षात्काराय विविध वर्णानां ज्ञानम् आवश्यकम्। वर्णानां भेदद्वयम् । प्रथमः प्रकाशमानः नाम (Bright) प्रकाशस्य वर्णः द्वितीयः अंधे (Dull) अंधकारस्य वर्णः। अंधकारस्य कृष्णः, नीलः कापोतः च वर्णः अप्रशस्तः। किंतु प्रकाशस्य कृष्णः, नीलः कापोतश्च वर्णः नैव अप्रशस्तः। इत्थमेव अंधकारस्य रक्तः, पीतः श्वेतश्च वर्णः प्रशस्तो न प्रकाशस्य तु रक्तः, पीतः श्वेतश्च वर्णः प्रशस्तः। ध्याने यान् वर्णान् वयं पश्येम ते प्रकाशयुक्ताः स्युः न तु अंधकारेण युक्ताः । आचार्यश्रीः महाप्रज्ञः एतदेव अधिकं स्पष्टं कुर्वन् ब्रूते यत् यदा व्यक्तेः चरित्रं शुद्ध्यति तदा तत् संकल्पः स्वयमेव फलति चरित्र शुद्धेः आधारेण संकल्प क्षमता जागर्ति। यस्य संकल्प-बलं जागर्ति तस्य काचिदपि कामना अपूर्णा न तिष्ठति । संकल्पः लेश्यां प्रभावयति लेश्या इत्यस्य बृहत् सूत्रम् अस्ति चरित्रम्। तेजोलेश्या, पद्मलेश्या शुक्ललेश्या इत्येता तिस्रः उज्ज्वल लेश्याः। एतासां वर्णः प्रकाशयुक्तः। कृष्णलेश्या, नीललेश्या कापोतलेश्या इत्येताः तिस्रोऽशुद्धलेश्याः अंधकारेण युक्ताः वर्णाः भवन्ति। एताः विकृतं भावं जनयन्ति पैदा करते हैं। इमे वर्णाः अस्मदआभामंडलं धूमिलं कुर्वन्ति । आभया प्रकाशेन वा युक्तवर्णाः आभामंडले निर्मलताम् उज्ज्वलतां च आनयन्ति। इमे आभामंडलस्य क्षमतां वर्धयन्ति। तदीयाः विद्युत-चुंबकीय रश्मयः अत्यन्तं शक्तिशालिनः भवन्ति।

होली-अवसरे आध्यात्मिकवर्णैः सह होलीं समाचरितुं प्रेक्षाध्यानस्य प्रक्रिया निश्चितमेव सुखदः एवं च एकः अलौकिकः अनुभवः वर्तते । वर्णाः लोकजीवने एव न अपितु शारीरिकदृष्ट्या, मानसिकदृष्ट्या आध्यात्मिकदृष्ट्या च अत्यन्तं महत्वं भजन्ते।

भवदीया

सम्पादिका

**Sri Ram Charit Manas Sundara Kanda**



'शान्तं शाश्वतमप्रमेयमनघं
निर्वाणशान्तिप्रदं
ब्रह्माशम्भुफणीन्द्रसेव्यमनिशं
वेदान्तवेद्यं विभुम्।।
रामाख्यं जगदीश्वरं सुरगुरुं
मायामनुष्यं हरिं
वन्देऽहं करुणाकरं
रघुवरं भूपालचूडामणिम् ।।'

**संकलन : एस.वासुदेव रावः**

कथाः

# मैत्री



**-डॉ. अरविन्द कुमार तिवारी**
परिकल्पकः
अमरवाणी कविपरिषद्, बागपतम्

'अरे। रे। कथमिमं ताडयन्तो वर्तन्ते भवन्तः? न्यवारयन् जनः, इति निगदन् जिगमिषुरन्यत्र स्वकारयानं स्थिर कृत्वा पथिकः कश्चिन्मार्गे द्विवान् समपृच्छत्।

'कोऽसि त्वम्भो? अयं कस्तव?' इति ताडका अवबन। असावादीत्

'नाहमस्य कस्यचिदस्मि। किन्तु यूयं त्रयः एकेन साकं कथमेव कुर्वाणाः स्थ।' इत्यकथयत्।

'गच्छतु भवानितो नेमं त्यक्ष्यामः, अयमेवास्ति अस्माक सिंहासनमपहरन् नगरेऽस्मिन्। न जानाति भवान्। अस्माक दलस्य शिलान्यासमेवायं दोलयन्नस्ति। इत्येक रोषाकुलः आचचक्षे। द्वितीयस्तु मुष्टिकया तं घातयन्नेवमुवाच 'कुरु दुष्प्रचारमस्माक' तव दलमेव विलीनं त्वयि मृते भविता।' तृतीयस्तु पादप्रहार कुर्वन् धराशायिनं तं पुरुषं परुषवचनैर्निन्दन्नवदत्-

'बहुधा अस्माकं मुख्यनेत्रा आकारितोऽपि न त्वमागच्छसि साकमस्माकमित्यस्यैव फलमास्वादयाद्य।' सर्वानिमान् सान्त्वयन् महानुभावो रक्षकस्तं धरापतितं पुरुषपुत्थापयन् समबोधयत् 'बन्धो! गच्छ गृहं त्यज राजनीतिम्। कलियुगमिदं नृत्यति सर्वत्र। यस्य हस्ते लगुडः, तस्यैव महिषीति सर्वे जानन्ति। कथमेकाकी एभिः सह योद्ध पारयिष्यसि ?

स जनः आत्मानं सम्भालयन् अपृच्छत्- 'अये महानुभाव! भवतो नाम किम् ? कुत आगतः ? कस्मादहमारक्षितो दुष्टेभ्यः? इति वदन् अनपसारितधूलिरेवासौ अग्रे पादाभ्यां गन्तुमुत्सुको जातः। 'अहमस्मि आरक्षिमहानिदेशकः, इमान् त्रीनपि कारां नेष्यामि, मम आरक्षका मामनुसरन्तः मम संकेतेन आगच्छन्तो वर्तन्ते।' एवं कुत्वा भयाकुलास्ते त्रयोऽपि ततः पलायितुमारभन्त। किन्तु अग्रे आरक्षकाः, पृष्ठे आरक्षकाः, सर्वत्र आरक्षका एष आरक्षका यथा लघ्व्क्रादहनकाले सर्वत्र वानरा एष वानराः दृष्टाः। त्रयोऽपि निगृहीता निगडिता नीयमाना परस्परमवलोकयन्तो महानिदेशकमवोचन्। महानुभाव। वयन्तु ते नेतुः धवकाः, एवं भायवितुमादेशः आसीत् अस्माकं नेतुरिति मत्वा अस्माभिरेव कृतम्। निर्दोषा वयं हातव्या भवद्भिः।

त्वक्ष्यामि किन्तु सत्यं ब्रूहि स्वराजनीतिविषये तदा, इति महानिदेशकवचनं श्रुत्वा तेषु एकः स्वकीयप्राणरक्षां मत्वा स्वमनोगतं वक्तुमारब्धवान्।

'श्रीमन्। वयं कस्यचिद्दलस्य सामान्या नेतारो येन केन प्रकारेण जनता विमूढा विधाय मतमधिगन्तुं सफला भवामः, किं किं करणीयं भवति, को जानाति? सम्मर्दे जनाहह्वानाय महत्कार्यं विधीयते। प्रतिजन एकसहस्रं रूप्यकाणि दत्त्वा ग्रामेभ्य जना आनीयन्ते सभास्थलम। महति आतपे करे दलस्य पताकमुत्थाप्य एवमेव जनता जयं ब्रूते महोदय।

द्वितीय उवाच-

'बलवन्। मद्यपायिनो बहवो मद्यमेव याचमाना आयान्ति, अभक्ष्यं च समास्वाद्य नेतुः जय जय इति कुर्वन्तः मत्ता इव आदिनं भ्रमन्तः सायं निजगृहं गन्तुकामाः धनं याचन्ते। सर्वमपि देयं भवति। ततो राजनीतिरपे वर्द्धते। महोदय । अकार्यं कार्यं भवति, अदर्शनीयं दर्शनीय भवति, ततः कदाचिज्जयमाप्नुमः।

तृतीय उवाच-

'जनरक्षक! भवान् किं न जानाति, वयमेव नेतृसमर्थकाः ग्रामेषु अग्निदाहं कुर्मः, शस्यानि ज्वालयामः, मन्दिरेषु मांस निक्षिपामः, अपरे अस्पृश्यता प्रसारयन्ति, धर्मविरोधमुत्पादयन्ति। जनता यदि परस्परं कलहायमाना विकलतामुनभवति तदा स्वयमेव उपस्थापय समाधानमपि अन्वेषयन्ति। हन्त! वराकी जनता ने वेत्ति सत्यमृषा वेति। स्वल्प सहयोग विधाय जननायका वयमिति विश्वासमुत्पाद्य जयं प्राप्य आपञ्चवर्षं महान्तमानन्दमनुभवामः।

एतत्सर्वमपि निशम्य मन्दं मन्दं हसन् महानिदेशक उवाच-

धिगिमां राजनीतिम्। यत्र कोमला जनता पीड्यते। एवं कर्तुं युष्माकं चेतसि लज्जा नोत्पद्यते?

किमर्थं लज्जा भगवन्! इत्येकेन कथितम्। भयभीता जनता नेतृविपरीतं गन्तुं नेच्छति। यदि कदाचिद् गच्छति तदा नेतृभिः तस्य पूर्वं ताडनं ततो हननमपि विधीयते। अतः पिधायमुखविवरं जनता मौनव्रतमेवाचरति। ततः कश्चिदेवंविधो नेता समुत्पद्यते तदा इति भाषमाणः प्रवाहेण स तूष्णीमभवत्।

मार्गे त्रयोऽपि पादं धृत्वा मुक्तियाचनमाकुर्वन्, दयालुर्वचनबद्धो निदेशकस्तान् न विमुक्तमपितु कारागारे निक्षेप्तुमादिशत्। तानानयन् आरक्षकाः।

ततो महानिदेशकः असावचिन्तयत्। यत् स नेता प्रष्टव्यो यस्य ताडनमेभिः कृतम्। पार्श्वं एव समुपविष्टं तमपृच्छत्-

अये युवन् ! भवता तु सर्वमपि श्रुतमेतेषा कथितम्। किं विचारयति भवान् ? स प्राह-

महोदय ! अहमस्मि ग्रामस्य सेवकः, मदीयो ग्रामो निर्धनः, निर्नालिकः, निर्विद्यालयः, निश्शौचलयः, निर्मार्ग इति बहुधा विज्ञाय मया बहुधा विधायकाय सांसदाय च निवेदनपत्राणि दत्तानि किन्तु नोत्तरं लब्धम्। अतो ग्रामे ग्रामान्तरे प्रतिदिनं भ्रामं भ्रामं जनतां जागयित्वा सर्वमपि अबोधयम्। जनतायाः पक्षतः एको निर्णयः कृतो यदहमेव नेता भवानि चेत् सा मम वार्ता मंस्यते । तस्या विश्वासं रक्षितुं ग्रामोन्नतिं कर्तुमहमेवमचिन्तयन्। किन्तु एते तु दैत्यसमाना मां हन्तुमेव प्रवृत्ताः सन्ति। यदि भवान्नाभविष्यत्तदा मम मृत्युरवश्यमेवाभविष्यत्। अहं भवन्तं न परिचिनोमि, अत्र महानिदेशकः खनेजामहोदयो वर्तते ।

सत्यमाह भवान्। खनेजामहोदय एवास्ति अत्रत्यो निदेशकः, अहन्तु नवीनो वर्ते, अद्य कार्यभारं ग्रहीतुमागच्छन्नेवमपश्यम्। क्षेत्रमिदं साधु न प्रतिभाति। किन्नामा भवानिति जिज्ञासुरस्मि। इति महानिदेशकजिज्ञासां परिशमयितुं वक्तुमारब्धवान्।

श्मशाशय। अतुलो नाम मम, समुत्तीर्णविद्यावारिधिरहं ग्रीष्मावकाशेषु आयामि ग्राम जन्मभूमिं निजां द्रष्टुम् । अत्रत्या दशा द्रष्टुं न शक्यते। किं किं वदेयम्? सर्वे अनर्था ग्रामेषु साम्प्रतं सम्पाद्यमानमस्ति। ग्रामस्था अलसशिरोमणयः संवृत्ताः। द्विवारं त्रिवारं निपीय धूमवर्ति चर्वयन्तस्ताम्बूलं तमालं खट्वां खण्डयन्तः सन्ततिमेवोत्पादयन्ति। महान् कालस्तेषां व्यर्थालापे प्रयाति। एकस्मिन् वर्षे तु द्विवारमेव कृषिकार्य भवति। ततस्तु एते रिक्तपाणयो मलिनमपि ग्रामं स्वच्छं कर्तुं नोत्तिष्ठन्ते। वृथा आपणेषु भ्रमन्तः कस्यचिद् द्रव्यं बलान्नीत्वा मद्यं पिबन्तो निजगृहकार्यमपि विस्मरन्तो नालिकामलजलमग्नाः क्वचिद् बडबडायमाना लक्ष्यन्ते। तेषु श्रमिकास्तु निपीततण्डुलमण्डपाः प्रातरारभ्य सायं यावत् श्रमं कृत्वा निवर्तन्ते निजगृहमिति पश्यामः, किन्तु नान्ये। अतएव ग्रामेषु वैषम्यमवलोक्यते।

सत्यं भणसि, इयमेव दशा सर्वस्यापि ग्रामस्येति महानिदेशकोऽथयत्। ततः आरक्षस्थलमयागतं वीक्ष्य अतुलः प्राथमिकीं लेखयितुमियेष। सर्वे गत्वा तत्कार्यमकार्षुरिति।

अतुल ! भवतो मार्ग एव मम मार्गो वर्तते। मेलिष्यावः। इति सरलस्वभावो महानिदेशकः प्रीतः सन्नुवाच। अतुलः संकोचं कुर्वन् प्रणम्यैव निर्गतः। इयं वार्ता तु ग्रामे ग्रामान्तरेषु च बहुतीव्र प्रसृता आसीत्। निवर्तमानमतुलं जनाः स्कन्धे उत्थाप्य ग्रामेषु नीतवन्तः । तत्र तत्र तस्य सम्बोधनमभूत्। स राष्ट्रप्रेमभावनया सर्वानपि बोधयन् पूर्वं देशभक्तिमेव प्रसारितवान्। अनेनोक्तं यद् यस्मिन् नेतरि मत्तसि देशसेवाभावना न वर्तते, स सेवां विधातुमेव न शक्नोति। यो नेता जनतायै निःशुल्कमेव सर्वं वस्तु दातुं घोषणां कथयति, तस्य वार्तायां कियानस्ति विश्वासः? स्वयमेव निभालनीयं भवद्भिः। अस्मिन् संसारे मृत्तिकापि निःशुल्कं न लभ्यते, तर्हि विद्युद्, जलं, भोजनं, यातायातमिति कुतः सुलभम्।?

एते नेतारः केवलं भ्रमयन्ति अरमान। स्वल्पं प्रदाय सर्वं विडालवदुदरीकुर्वन्ति। अतो विचार्य मतदानं विधेयम्। नाहं कदापि याचे मतं स्वार्थाय, किन्तु देशहितं यत्र निहितं तत्रैव मतं देयम्। अस्माकं देशः सर्वेषां प्राणिनामरित देशः, अत्र सर्वा जातयः परस्पर प्रेम्णा निवसन्ति, अनेका भाषाः वेशभूषा आलापाश्च अस्य देशस्य एकतामेव द्रढयन्ति। अतः नेतृणां द्वेषभावनां विहाय मैत्रीस्थापनाय देशहितार्थमेव भवद्भिः स्वं बहुमूल्यं मतं देयम। अन्यथा रोदनमेव हस्ते आगमिष्यति, यदि द्रव्यं गृहीत्वा जातिं धर्मं लिंग वा दृष्ट्वा देशहितमुपेश्य मतदान कुर्वन्ति भवन्तश्चेत्।

अतुलस्य वक्तव्यमिदं बहूनां नेतृणां कृते प्राणहरमासीत्। वृत्तपत्रेषु प्रकाशितामिमां वार्ता पठित्वा अनेके दला येन केन विधिना अतुल पराजेतुमुपायानचिन्तयन्। किन्तु सर्वे उपायास्तेषां विफलाः। काले विजयश्रीरस्यैवातुलस्य ग्रीवामवृणोत्। ग्रामीणैरस्य विजयं मन्वानाः शोभायात्रामायोजयामासुः। बहुसम्मानं कृत्तम्। अनेकैस्तु स्वार्थाय अस्य सामानो बहुविधो विहितः। अनेनोक्तमपि यत् 'भो भो ग्रामीणा बन्धवः। मम स्वागतं मा कुरुत। क्षेत्रविकासाय स्वविचारान् प्रेषयत। मया साकमस्मिन् मञ्चे या विराजमाना भारतीया नारी दृश्यते सा मम भार्या सुगन्धास्ति, अनया एवमहं जागरितो देशसेवायै भवतां पुरस्तादुपस्थितो भाषमाणो वर्ते। जानन्तु भवन्तो भवन्तो यदेकदा यदाहं दुष्टैः पीडितो भूत्वा राजनीति विहातु निर्णय कृतवान्, तदा इयमेव मां साक्षाद् भारती भूत्वा साभिनयमबोधयत्। इयमकथयत्-

'हे नेतः।। भवता देशसेवायै पदमग्रे कृत्तमस्ति। भवन्ति बहु विघ्नाः शुभकार्यारम्भे। किन्तु किं सदाचारी धैर्यवान् सर्वं सोढ्वापि लक्ष्यमधिकरोत्येव। इयं महिलासु देशभक्तिभावनामभरत्। मह सहगामिनी मम मार्गदर्शिकेवेदानीमस्ति संवृत्तेति विभाव्य मोदमानो वर्ते।' इत्युक्त्वा सुगन्धां संकेतितवान् जनता नन्तुम्। विनम्रस्वभावा, लक्ष्मीरिव मृदुभाषिणी सुगन्धा बद्धाञ्जलिना प्रणतवती। मुदितया जनता आशीराशिभिरसौ अभिषिक्तेति ततः अतुलः अपृच्छत् सर्वान् मंचादेव-प्रथमा आवश्यकता अस्य क्षेत्रस्य का वर्तते। उत्तरसायत जनतादीर्धाभित्तेः जलं जलं जलम्।

द्वितीया समस्या का वर्तते, पुनरुत्तरमागतम् विद्यालयाभावः विद्यालयाभावः।

शेषभागः सप्तमपुटे

(वर्णव्यवस्थायाः विशेषसन्दर्भे)

# स्वामिदयानन्दस्य चिन्तने सामाजिकी व्यवस्था

-प्रो. (डॉ.) सुन्दरलाल कथूरिया, डी, लिट्,
बी-3/79, जनकपुरी, नई दिल्ली-110058

स्वामी दयानन्दः महान् समाजसुधारकः आसीत्। वेदे तस्य दृढास्थासीत्। ऋषिवरस्य समग्रचिन्तनम् वेदानुकूलमस्ति, अतः तस्य ख्यातिः वेदोद्धारकरूपेण वर्तते। तस्य समये वेदाः विलुप्ताः आसन्, तेन महत्प्रयत्नेन पुनरुद्धारिताः वेदाः, अतः वेदोद्धारक इति अभिधानम् सार्थकम् ऋषिवरेण दयानन्देन सह।

स्वामिदयानन्दस्य समये भारतस्य सामाजिकी स्थितिः चिन्तनीयासीत्। जातिप्रथया समाजस्य हिन्दूजातेश्च एकता छिन्ना भिन्नासीत्। हेयदृष्ट्यावलोकिताः निम्नजातिजनाः शूद्राश्च। तान् प्रति समाजस्य उच्चवर्गस्य व्यवहारः पशुवत् आसीत्। योषितां स्थितिः पदत्राणवदासीत्। वेदाध्ययनस्य अधिकारः नासीत् स्त्रीशूद्राणाम्। आर्यावर्ते अस्पृश्यतायाः अशिक्षायाः अन्धविश्वासस्य च वर्चस्वितासीत्। समाजे मूर्खगुणहीनब्राह्मणस्य बहुमान आसीत् परं च विद्यागुणयुक्तः शूद्रः अपमानित आसीत्। विधवायाः समाजे दुर्दशासीत् न च तस्याः पुनर्विवाहस्य व्यवस्था। नासीत् गोवधे प्रतिवन्धः। करुणार्द्रदयानन्देन अवलोकिता गोजातेः दुर्दशा, लिखिता च एका लघु पुस्तिका 'गोकरुणानिधिः' इति शीर्षकेण, प्रतिपादितं च गोपालनस्य गोसंरक्षणस्य च महत्त्वम् आर्थिक सामाजिकाध्यात्मिकदृष्ट्या।

स्वामिदयानन्दस्य समये मूर्तिपूजायाः प्रचलनम् बहुशः आसीत्, वर्तमानकालेऽपि वर्तते, किन्तु दयानन्दस्य चिन्तने नास्ति मूर्तिपूजायाः किमपि महत्त्वम्। एक ब्रह्म द्वितीयं नास्ति, न च तस्य प्रतिमास्ति, अतः स एव ईश्वरः उपासनीयः, न तु जडदेवताः। तस्य समये मन्दिरे शूद्राणाम् प्रवेशः वर्जितः आसीत्, ते अस्पृश्याश्च आसन्। महर्षिदयानन्दस्य चिन्तने सर्वे मानवाः ईश्वरस्य सन्ततिः। नास्ति तेषाम् विभेदः। सर्वे मानवाः समानरूपेण परमात्मभक्त्याः अधिकारिणः। स्पृश्यास्पृश्यभेदः अनुचितः, स च भेदो निजस्वार्थवशेन संकीर्णमनोवृत्या पण्डितैः कृतः। 'स्त्रीशूद्रौ नाधीवात्तामिति श्रुतेः' इत्येक वचनं नास्ति सत्यम्। श्रुतिश्चेयं कपोलकल्पनाप्रसूता, न तु कस्यचित् प्रमाण-भूतस्य ग्रन्थस्य। सत्यार्थप्रकाशस्य तृतीयसमुल्लासे ऋषिवरदयानन्दस्य सुचिन्तितं सप्रमाणं मन्तव्यम् इत्थमस्ति 'निखिलमानवानां वेदादिशास्त्राध्ययन श्रवणाधिकारप्रदर्शक प्रमाणं यजुर्वेदस्य षड्विंशेऽध्याये द्वितीयो मन्त्रः-

**यथेमां वाचं कल्याणीमावदानि जनेभ्यः।**
**ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च॥**

परमेश्वरोऽभिधत्ते यथाहं (जनेभ्यः) सर्वमानवेभ्य इमां (कल्याणर्णी) कल्याणम्-अभ्युदयनिः श्रेयससुखम् तत्प्रदायिनीं (वाचम्) ऋगादिवेदचतुष्टयगिरं (आवदानि) उपदिशामि तथैव यूयमप्यनुतिष्ठत। नन्वत्र जनशब्देन द्विजा एव ग्राह्याः स्मृत्यादिग्रन्थेषु हि वेदाध्ययने ब्राह्मणक्षत्रियवैश्यानामेवाधिकारो वर्णितः न तु योषितां शूद्रादिवर्णानां वेति शंकां परिहरन् स्वयं परमेश्वरः प्राह (ब्रह्मराजन्याभ्यामित्यादि) परमेश्वर प्राह-अस्माभिर्ब्रह्मणक्षत्रियाभ्यां (अर्याय) वैश्याय शूद्राय (स्वाय) निजभृत्येभ्यो योषादिभ्यश्च (अरणाय) अतिशूद्रादिभ्योऽपि प्रकाशिता वै वेदाः। सर्वे मानवा वेदानामध्ययनाध्यापनेन श्रवणश्रावणेन च विज्ञानं परिवर्ध्य सत्कर्मणा ग्रहणेनासत्यस्य च परित्यागेन दुःखेभ्यः परिमुच्यानन्दं समवाप्नुयुः।[1]'

देवदयानन्दस्य युगः नवजागरणस्य समाजसुधारस्य चासीत्। ब्रह्मसमाजः, प्रार्थनासमाजः, थियोसोफिकल सोसाइटी सत्यशोधकसमाजादयः स्वस्वप्रकारेण समाजसुधारस्य कार्य संलग्ना आसन्। ब्रह्मसमाजस्य बलं सतीप्रथायाः उन्मूलने आसीत्। ऋषिवरदयानन्दस्य पूर्ववर्तिनां समवर्तिनां च समाजानां चिन्तनं पाश्चात्त्यविचारधारया प्रभावितमासीत् किन्तु दयानन्दस्य चिन्तनस्य मूलाधारो वैदिकचिन्तनं वेदाः आर्षग्रन्थाः चासन्। अन्यसमाजानां दयानन्दसंस्थापितस्य आर्यसमाजस्य समाजसुधारदृष्ट्या अस्मात् कारणात् अस्ति महदन्तरम्। ऋषिवरेण समीक्षिता अन्यसमाजानां कार्यपद्धतिः उदारनिष्पक्षदृष्ट्या।

महर्षि दयानन्दः क्रान्तद्रष्टा ऋषिः आसीत्। स न केवलं तत्त्वचिन्तकः अध्यात्मनेता ऋषिः आसीत् अपितु महान् समाजसुधारकोऽपि आसीत्। व्यथितः सः भारतस्य पारतन्त्र्येण। सः स्वदेशस्य स्वभाषायाः स्वराज्यस्य च समर्थकः आसीत्। लिखितं ऋषिवरेण सत्यार्थप्रकाशस्य अष्टमसमुल्लासे श्साम्प्रतं दुर्विपाकादार्याणामालस्यप्रमादाभ्यां पारस्परिकविरोधाच्च कैव कथान्यदेशराज्यस्य नास्त्यार्यावर्तेऽपि साम्प्रतमार्याणामखण्डमकुतोभयं स्वतंत्र स्वाधीनं राज्यम्। यत्किंचिदस्ति तदपि वैदेशिकैः पद्भिराक्रम्यते। केवलमल्पीयांसो राजानः स्वतन्त्राः। समागच्छत्सु दुर्दिनेषु देशवासिभिर्नाना-विधानि दुःखानि ननु भुज्यन्ते। वैदेशिकेषु नितंराम्प्रजाः सुखयितुं यतमानेष्वपिं स्वदेशोद्भवानामेव राज्यमनुत्तमं भवति सर्वतः। मतमतान्तराग्रहशून्यमात्मीयपरेषां पक्षपातविरहितं पितराविव सानुकम्पं प्रजासु न्यायदयासंयुत्तमपि वैदेशिकानां राज्यं नास्ति पूर्णसुखप्रदम्। परं पृथक् पृथक् भाषाणां शिक्षापद्धतीनां व्यवहारस्य चाग्रहपरित्यागः सर्वथैव दुष्करः। न चास्माद् ते परस्परस्योपकृतिरभिप्रायों वा शक्यः साधयितुम्। तस्माद् वेदादिशास्त्रेषु वर्णितानां व्यवस्थेतिहासानां सम्मानम्भद्रपुरुषोचितंमस्ति।'[2] ऋषिवरस्य दृष्ट्या वेदाः स्वतः प्रमाणं अन्ये ब्राह्मणादय आर्षग्रन्थाः परतः प्रमाणम्।

श्रीमद्दयानन्दस्य चिन्तनस्याधारः वेदाः ब्राह्मणादि आर्षग्रन्थाः च सन्ति।

स्वामिदयानन्दस्य सामाजिकी व्यवस्था मुख्यरूपेण वर्णाश्रमधर्माधारितास्ति, अद्यापि उपरिलिखितानां सर्वासां मान्यतानां समावेशोऽपि तत्रास्ति। ऋषिवरस्य चिन्तने नास्ति जातिप्रथाया मान्यता परंच वर्णव्यवस्थायाः स्वीकृतिः वेदानुकूलिनी। जातिप्रथा तु स्वार्थे रतानां जनानां हितकारिणी। तेषामुद्देश्यम् अशिक्षायाः प्रचारेण स्वहितसाधनं एव। देवदयानन्दानुसारेण, श्इदानीन्तनाः सम्प्रदायिनः स्वार्थैकतत्परा ब्राह्मणाश्चान्यान् विनिवर्त्य विद्यासत्संगाभ्यां स्वपाशेन बनन्ति। तेषां देहमनोधनानि च प्रणाशयन्ति। ते हि 'क्षत्रियादयो वर्णा अधीत्य लब्धविद्याः, सन्तोऽस्मत्पांखण्डजालात् परिमुच्य विज्ञाय चास्मच्छलमस्मानवमंस्यन्त' इति मन्यन्ते। भूमिपालाः प्रजावर्गश्चैवमाद्यन्तरायान् निरस्यात्मसन्ततीरध्यापयितुं देहमनोवित्तैः प्रयतेरन्'। स्पष्टतः दयानन्दस्य सामाजिकव्यवस्थायां शिक्षायाः विशेषमहत्त्वमस्ति विना भेदभावेन। शिक्षया विना आदर्शसमाजस्य परिकल्पना अपूर्णास्ति। चाणक्यनीत्याधारितं ऋषिवरस्य एतद्विषयकं चिन्तनं अवलोकनीयं विचारणीयं च-

**माता शत्रुः पिता वैरी येन बालो न पाठितः।**
**न शोभते सभामध्ये हंसमध्ये बको यथा ॥**

(चाणक्यनीतिः अध्याय-2, श्लोकः 11)

तौ हि जननीजनको स्वीयसन्तानानां पूर्णवैरिणौ स्तः यौ तान् विद्यां नाधिगमयतः। अनधिगतविद्यास्ते हि विपश्चितां परिषदि हंसमध्ये बका इव अनादृता अशोभनीयाश्च भवन्ति। आत्मसन्ततिभ्यो देहमनोवित्तैः विद्या- धर्म-सभ्यतोत्तम शिक्षासम्प्रापणमेव जनकयोः कर्त्तव्यं कर्म, परमो धर्मः, यशस्करं च विद्यते।[4]

महर्षिदयानन्दस्य वर्णव्यवस्थायाः आधारः यजुर्वेदस्य निम्नांकितः सुप्रसिद्धमन्त्रः अस्ति-

**ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।**
**ऊरू तदस्य यद्वैश्यः पद्भ्याम् शूदो अजायत ॥** (यजुर्वेद, 31/11)

उद्धृतोऽयं मन्त्रः सत्यार्थप्रकाशस्य चतुर्थसमुल्लासे दयानन्देन प्रमाणरूपेण। 'अस्य मन्त्रस्यायमर्थों यद् मुखाद् ब्राह्मणो बाहुभ्यां क्षत्रिय करुभ्यां वैश्यः पद्भ्यां च शूद्रः समुत्पन्न इति। यथा च वदनं भुजादिकं भुजादयश्च मुखं न भवन्ति तथैव न सम्भवति ब्राह्मणः क्षत्रियादिः क्षत्रियादिर्वा ब्राह्मणः। प्रश्नरूपेण उद्धृतोऽयमर्थो महर्षिणा। तस्य चिन्तनानुसारेण, 'अनुपपन्नः खल्वयं भवत्परिकल्पितो मन्त्रार्थः। अत्र हि पुरुषो निराकारो ब्यापकः परमात्मानुवर्तते। निराकारस्य सतस्तस्य न सम्भवन्ति मुखाद्यंगानि। मुखाद्यंगसंयुक्तो हि पुरुषो व्यापको न भवेदव्यापकश्च सर्वशक्तिमान्, अष्टा, धर्ता, संहर्तेत्यादि विशेषणैर्विशेषयितुं न शक्येत तस्मादस्य मन्त्रस्यायमर्थः-

अस्य सर्वव्यापिनः परमात्मनोऽस्मिन् सर्गे मुखमिव सर्वेभ्यो मुख्यः श्रेष्ठः (ब्राह्मणः) विप्रः (बाहुः) 'बाहुवै बलं (5/4/11) बाहुलें वीर्यम्' (6/3/2/35) इत्यादि शतपथवचनेन बलवीर्ये बाहुशब्देन समाख्यायेते। समधिकबलवीर्यः (राजन्यः) क्षत्रियः (ऊरूः) श्रोणेरथो भागां जानुनश्चोपरितनभाग ऊरूशब्देन व्यपदिश्यते, यो वै सर्वपदार्थानां व्यवहाराय सकलदेशे कॉर्बलेन यातायातं प्रकुर्वीत स वैश्यः (पद्भ्यां) चरणमध मांगमिव मौख्यादिगुणवांश्च शूद्रः। शतपथब्राह्मणादिष्वयं मन्त्र इत्थमेव व्याख्यायते तथा च 'यस्मादेते मुख्यास्तस्मान्मुखतो ह्यसृज्यन्त' इत्यादि। सर्वेषां मुख्यतया मुखत इमे समुत्पन्ना इति वचनं सर्वधैव संगच्छते। अशेषांगेषु मुखमिव मानवजाती वैदुष्येनोत्तमगुणकर्म स्वभावसंयुक्ततया च ब्राह्मणः श्रेष्ठः। परमात्मनो निराकारतया मुखाचंगाभावान्मुखतः समुत्पत्तिर्वन्ध्यपुत्रस्योद्वाह इव सर्वथैवासम्भवा।'[5] स्पष्टतया दयानन्दस्य चिन्तने वर्णाः चत्वारः- ब्राह्मणः, क्षत्रियः, वैश्यः शूद्रश्च। तस्य चिन्तने वर्णव्यवस्था गुणकर्मस्वभावाधारिता, न तु जन्माधारिता। अत्र मनुस्मृतेः प्रमाणम्

**शूद्रो ब्राहाणतामेति ब्राह्मणचौति शुद्रताम्।**
**क्षत्रियाज्जातमेवन्तु विद्याद्वैश्यात्तथैव च॥** (मनु, 10/65)

स्वामिदयानन्दः लिखति श्समुत्पद्यापि शूद्रकुले ब्राह्मणक्षत्रियवैश्यैः समानगुणकर्मस्वभावः शूद्रो ब्राह्मणः क्षत्रियों वैश्यो वा भवेत् एवं ब्राह्मण क्षत्रियवैश्यकुलसम्भूतोऽपि गुणकर्मस्वभावैः शूद्रमनुकुर्वन् शूद्रो भवेत् तथैव क्षत्रियवैश्ययोः कुले प्रजातो ब्राह्मणशूद्राभ्यां समानो विप्रः शूद्रों वा सम्पद्यते। चतुर्व्वपि वर्णेषु या यः पुमान्नारी वा यद्वर्णयोग्यो भवेत् तस्य तस्मिन् वर्ण परिगणना विधेया।[6]

स्वयत्नेन गुणकर्मस्वभावेन अनेकैः ब्राह्मणत्वं समुपार्जितम्। प्रश्नोत्तरेण सत्यार्थप्रकाशस्य चतुर्थे समुल्लासे प्रतिपादितं महर्षिणा इत्थम्-

'प्र- किं' ब्राह्मणयोरेव प्रसूतिब्राह्मणत्वं प्रतिपद्धत्ते आहोस्विदितरवर्णस्थयोरपि जनकयोः सन्ततिर्विप्रत्वमधिगन्तुं शक्नोति?

उ. आम्, अभवन्ननेके, भवन्ति, भविष्यन्ति च। 'छान्दोग्योपनिषदि अज्ञातकुलो जाबाल ऋषिः महाभारते च क्षत्रियवर्णसम्भवो विश्वामित्रश्चाण्डालकुलोत्पन्नो मतंगश्च ब्राह्मणत्वं प्रतिपन्नाः इत्युपन्यस्तम्। साम्प्रतमपि सत्त्वभावो विद्वानेव ब्राह्मणत्वमर्हति मूर्खश्च शूद्रताम्। तथैव चाग्रेऽपि भविष्यति।[7]

स्वमन्तव्यामन्तव्यप्रकाशेऽपि स्पष्टतया निर्धान्तंशब्दैः व्यक्तं स्वमतं महर्षिणा वर्णाश्रमः गुणकर्मणा योग्यतया समाचरणं वर्णाश्रमभावं मन्ये।[8] एतेषां वर्णानां गुणस्वभावकर्माणि मनुस्मृत्या गीतावाश्चाधारे वर्णितानि महर्षिणा। तेषामादौ विप्राणां गुणकर्माणि-

**अध्यापनमध्ययनं यजनं याजनं तथा।**
**दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्॥** (मनु. 1/88)
**शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।**
**ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।** (गीता 18/12)

उपरिलिखितश्लोकद्वयाधारेण विप्राणां पंचदश कर्माणि गुणाश्च। तेषां नामानि । अध्ययनम् 2. अध्यापनम् 3. यज्ञानुष्ठानम् 4. यज्ञानुष्ठापनम् 5. दानं 6. प्रतिग्रहः 7. शमः 8. दमः 9. तपः 10. शौचम् 11. शान्तिः 12. आर्जवम् 13. ज्ञानम् 14. विज्ञानम् 15. आस्तिक्यं च इति।

क्षत्रियाणां गुणकर्माणि-

**प्रजानां रक्षणं दानमिज्याध्ययनमेव च।**
**विषयेष्वप्रसक्तिश्च क्षत्रियस्थ समासतः॥** (मनु. 1/28)
**शौर्य जो धृतिदांक्ष्यं युद्धे चाप्यपलायनम्।**
**दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।** (श्रीमद्भगवद्गीता 18/43) क्षत्रियगुणकर्माणि अधोलिखितानि द्वादश 1. न्यायेन प्रजानाम् रक्षणम् 2. दानम् 3. इज्या अर्थात् यज्ञानुष्ठानमनुष्ठापनं च 4. अध्ययनम् 5. विषयेष्वप्रसक्तिः 6. शौर्यम् 7. तेजः ८. धृतिः 9. दाक्ष्यम् राष्ट्रप्रजासम्बन्धि सकलव्यवहारेश्वशेषेषु च शास्त्रेषु वैदग्ध्यं 10. युद्धे अपलायनम् 11. दानम् ईश्वरभावश्च इति।

निम्नांकितानि वैश्यानां गुणकर्माणि मनुस्मृतौ प्रतिपादितानि-

**पशूनां रक्षणं दानमिज्याध्ययनमेव च।**
**वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च॥** (मनु. 1/80)
**कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।** (गीता 18/44 (पूर्वार्द्ध)

1. पशूनां रक्षाणम् 2. दानम् 3. इज्या अग्निहोत्रादियज्ञविधानम् 4. अध्ययनम् 5. सर्वप्रकारेण वाणिज्यानुष्ठानं वणिक्षथः वाणिन्यं वा 6. कुसीदम्-मूलधनात् द्विगुणं-रूप्यकमेकं प्रदाय शतवर्षेष्वपि रूप्यकद्वयाधिकस्याग्रहणं नापि प्रदानं, चतुः षडष्ट द्वादश षोडश विंशतिवाणकेभ्योऽधिकवृद्धेरग्रहणम् 7. कृषिश्च इमानि वैश्यानां गुणकर्माणि। शूद्रस्य तु एकमेव कर्म-

**एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।**
**एतेषामेव वर्णानां शुश्रूषामनसूयया ॥** (मनु. 1/62)

ब्राह्मणक्षत्रियवैश्यानां परित्यज्य ईर्ष्याहंकारादिदोषान् शुश्रूषा एकमेव कर्म शूद्रस्य। इमान्येव चतुर्णा वर्णानां गुणकर्माणि समासतः।

अस्य विवेचनस्य निष्कर्षः देवदयानन्दानुसारेण इत्थमस्ति- 'यस्मिन् पुरुषे यद्वर्णसमुचितानि गुणकर्माणि भवेयुस्तस्मै तस्यैवाधिकारः सम्प्रदेयः व्यवस्थयानयोन्नतिमन्तो भवन्ति सर्वेऽपि मानवाः। विद्याधर्मप्रचारो ब्राह्मणेषु विनिवेशनीयस्ते हि विद्वत्तया धार्मिकतया च सम्यक् प्रभवन्ति तदाचरितुं, क्षत्रियेभ्यः राज्याधिपत्यप्रदानेन न कदापि विनंक्ष्यति राष्ट्रम् । यथावदाचरितुं सक्षमतया पशु- पालनाधिकारो विड्द्भ्यः प्रतिपादयितव्यः । विद्याराहित्येन मूर्खतया विज्ञानसम्बन्धिकार्याणि नानुष्ठातुं शक्नोति यतस्तस्मात् परिचारणमेव वरीयः कर्म शूद्रस्य । स हि प्रभवति शारीरं कर्मजातमनुष्ठातुम्। एवं समस्तवर्णानां नियोगेषु प्रवर्तनं पार्थिवादीनां सभ्यजनानां कर्तव्यम्।

संक्षेपतः स्वामिदयानन्दस्य चिन्तने सामाजिकी वर्णव्यवस्था गुणकर्मस्वभाव-सत्यन्यायधर्माश्रिता । अस्या महदुद्देश्यम् सामाजिक सामंजस्यसुखशांतिः । अस्या व्यवस्थायाः परिपालनेन अभ्युदयनिःश्रेयसप्राप्तिः सहजसम्भवा। वर्णाश्रमधर्मपालनेन संभवमेतद्-

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिदुःखभाग्भवेत्।**

1. सत्यार्थप्रकाशः (संस्कृतानुवादः), तृतीयसमुल्लासः, पृ.58
2. उपरिवत्, अष्टमसमुल्लासः, पृ.195
3. सत्यार्थप्रकाशः (संस्कृतानुवादः), तृतीयसमुल्लासः, पृ.58
4. उपरिवत्, द्वितीयसमुल्लासः, पृ.25 3. उपरिवत्, चतुर्थसमुल्लासः, पृ. 69
5. सत्यार्थप्रकाशः (संस्कृतानुवादः), तृतीयसमुल्लासः, पृ.69-70
6. उपरिवत्, अष्टमसमुल्लासः, पृ.70
7. उपरिवत्, अष्टमसमुल्लासः, पृ.68
8. स्वमन्तेव्यामन्तव्यप्रकाशः, क्रमांक 16
9. द्रष्टव्यः - सत्यार्थप्रकाशः (संस्कृतानुवादः), चतुर्थसमुल्लासः, पृ. 71-72
10. द्रष्टव्यः-उपरिवत्, चतुथसमुल्लासः, पृ.72
11. द्रष्टव्यः- (क) उपरिवत्, चतुर्थसमुल्लासः, पृ.73
(ख) श्रीमद्भगवद्गीता, 18/44 (उत्तरार्द्धः)
12. सत्यार्थप्रकाशः (संस्कृतानुवादः), चतुर्थसमुल्लासः, पृ.73





प्रो. बनमाली बिश्वाल:

## संस्कृते: रक्षकं वन्दे दयानन्दं सरस्वतीम्

राष्ट्रस्याभ्युदयार्थं य: सन्न्यासी समजायत।
महर्षिणं दयानन्दं सरस्वतीं नमाम्यहम्॥
ज्ञानपरम्पराया य: संवाहकोऽस्ति सर्वथा।
सरस्वत्यभिधं नौमि दयानन्दं महर्षिणम्॥
यस्त्वत्र वेदरक्षायै चासीत् पूर्ण-समर्पित:।
तं वेदपुरुषं नौमि दयानन्दं सरस्वतीम्॥
रक्षार्थमेव वेदानां व्याकरणमधीतवान्।
शब्दसंस्कारकं वन्दे मुनित्रयसमर्थकम्॥
वस्तुषु यस्य काव्यानां द्योत्यते भारतीयता।
दयावन्तं दयानन्दं वन्दे महर्षिणं मुदा॥
चिन्तने यस्य वाग्देवी सदा सद्बुद्धिदायिनी।
महर्षिणं स्मराम्यत्र पुमंशे च सरस्वतीम्॥
समाजोद्धारकं वन्दे महर्षिणं महामतिम्।
संस्कृते: रक्षकं वन्दे दयानन्दं सरस्वतीम्॥
पोषकं हिन्दूधर्मस्य चार्यसमाजस्थापकम्।
मूलशङ्करनामानं त्यागिनं प्रणमाम्यहम्॥
संस्कृतरक्षकं वन्दे वेदविद्यापरायणम्।
त्यागिनं योगिनं वन्दे राष्ट्रहिते सदा रतम्॥
स्वधर्मस्य स्वभाषाया: स्वराष्ट्रस्याथ संस्कृते:।
उन्नतये स्वदेशस्य योऽग्रदूतो नमामि तम्॥
कृण्वन्तो विश्वमार्यञ्च सिद्धान्तो यस्य वैदिक:।
श्रेष्ठा: भवन्तु संसारे जीवन्ति ये च मानवा:॥
यजुर्वेदीय-मन्त्रोऽयं प्रियस्तस्यास्ति मन्यते।
दुर्गुणानां विनाशाय प्रार्थ्यते यत्र चेश्वर:॥
ये च महत्तमा: पक्षा: राष्ट्राभ्युदयकारका:।
तदर्थञ्च दयानन्द: सदैवासीत् समर्पित:॥
स्वातन्त्र्यान्दोलने तस्य भूमिका सक्रिया मता।
स्वदेश्यान्दोलने तस्य योगदानं व्यशिष्यत॥
ज्ञानपरम्परायां च भारतस्य विशेषत:।
महद्धि योगदानं वै दयानन्दस्य वर्तते॥
वेद-वेदाङ्गशास्त्राणि शास्त्राणि दर्शनस्य वै।
येनात्मसात्कृतान्येव तस्मै महर्षिणे नम:॥

## हास्यकणिका:



-डॉ.अरविन्दकुमारतिवारी
परिकल्पक:
१ अमरवाणी-कविपरिषद:

सरिद्गङ्गाकूले गिरिवरसुतासङ्गलसितो
भुजङ्गाङ्ग: शम्भुर्विधिविभवमुग्धो भवपति:।
सरद्वस्त्रो मन्दं गणपतिकुमारान्वितवपु
हसल्लोकं पश्यन् सुखयतु शिवो भारतभुवम्॥ १

प्रभाते मां पतिं भार्या तर्जयन्ती रुषाऽब्रवीत्।
किं करोति भवान् काव्यं विलिखाम्यहमब्रवम्॥२

कविर्देवो मतो लोके शङ्करोऽस्मि न संशय:।
ताण्डवं कुरुते जाने भार्या वचनमब्रवीत्॥ ३

भोजनं गृहिणीपक्वं भर्ता सर्वं तु भुक्तवान्।
दृष्ट्वैतत् कुपिता कान्ता रक्तनेत्राऽवदन्मुहु:॥ ४

बुभुक्षा भवत: स्वामिन्! अहो! बलवती मता।
यया सम्पीडितो भोज्यं सर्वं सम्भुक्तवान् भवान् ॥ ५

तस्यास्तद्वचनं श्रुत्वा मोदमानोऽब्रवीत् पति:।
भुक्तं तव पत्या नाहं त्वत्पुत्रस्य पिताथवा ॥ ६

## होलिका रे सखे!



प्रो. ताराशंकरशर्मा पाण्डेय:

होलिका रे सखे! होलिका रे सखे!
मन्यते भारते होलिका रे सखे!
सुरक्ता: सुपीता: सुनीला हि बाला:
सुवाद्यै: सुगीतै: सुनृत्यै: प्रमत्ता:।
सुभोज्यै: सुपेयै: सुभङ्गै: सुतृप्ता:
सकामा:सवामा:सहाला हि जाता:॥1॥
होलिका रे सखे! होलिका रे सखे!
मन्यते भारते होलिका रे सखे!
गायिका नायिका गायको नायको
लासिका राधिका लासको मोहन:।
बालका: साधका गोपिकाऽऽराधिका
नैकरागाम्बुधौ मज्जिता हर्षिता: ॥2॥
होलिका रे सखे! होलिका रे सखे!
मन्यते भारते होलिका रे सखे!
भारते भूषणो भारतीभूषणो
राधिकाऽऽराधको गोपिकामोहन:।
को मनोहारक: को मनोहारक:
कोपि गोपालक: कोपि गोपालक:॥3॥
होलिका रे सखे! होलिका रे सखे!।
मन्यते भारते होलिका रे सखे!॥

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित- प्रतिनवबाणभट्ट- पण्डित-श्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजीवैदिक-विश्वविद्यालय-कुलपतिना प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं 'होलिका रे सखे!' नाम होलिकागीतकाव्यं सम्पूर्णम्।

## व्यजनम्



डॉ. विपिनकुमारद्विवेदी
पीसीपी इंटर कॉलेज हुसैनगंज,
फतेहपुर

चलति सवेगं उपरि व्यजनम्,
स`स`कुरुते अधिकं व्यजनम्।
विद्युता भवति चालितं व्यजनम्,
घर्मं दूरीकुरुते व्यजनम्॥
पिंजनोदने आरम्भ: भवति,
तीव्रं मन्दं तेनैव चलति।
विद्युत् सहसा यदा च गच्छति,
तदा स्थिरं भवति हि व्यजनम्॥
वायुं नितरां कुरुते व्यजनम्,
शीतलदेहं कुरुते व्यजनम्।
कक्षे कक्षे भवति व्यजनम्,
छदिशोभां च कुरुते व्यजनम्॥
शीतकाले विश्रमति व्यजनम्,
श्रमति उष्णे सततं व्यजनम्।
स्वेदं शीघ्रं शोषयित्वा,
सुखं प्रदत्ते भृशं च व्यजनम्॥
विविधवर्णीयं भवति व्यजनम्,
कृष्णं क्वचित् च श्वेतं व्यजनम्।
पक्षत्रयेण युतं सदैव,
अध: लंबितं भवति व्यजनम्॥
पिण्डम् एकं मध्ये तिष्ठति,
केन्द्रं तस्य मुख्यं भवति।
वृत्ताकारेण भ्रमति च व्यजनम्,
बहु सुन्दरं लगति व्यजनम्॥
भेदं नहि कुरुते व्यजनम्,
समेभ्य: वायुं दत्ते व्यजनम्।
यथासमयं संचालनेन,
विद्युत: रक्षां कुरुते व्यजनम्॥

## शिवपञ्चकम्



-डॉ श्रेयांश द्विवेदी
संस्थापक कुलपति
मवासंविवि, कैथल
हरियाणा

वैराग्यं सुविहाय येन मनसा गार्हस्थ्यधर्मश्चित:।
पत्नीत्वेन चिता हिमाचलसुता सङ्कल्पिता मानिनी।
अस्मिन्नेव दिने विवाहविधिना शम्भुर्गृहस्थोऽभवत्।
श्रद्धाभावसमन्वितास्तु सुजना: नत्वा प्रमोदङ्गता:॥1
गार्हस्थ्यं सततं धनञ्च विपुलं गोत्रं कुलं संस्कृतम्।
संस्कारेण समुन्नतं सुखयुतं पौत्रीञ्चपौत्रं यश:।
नैरुज्यं हरचिन्तनं सुसरलङ्गेहे सुविद्या शुभा।
हे शम्भो! शिवरात्रिपर्वणि गृहे सर्वाणि वाञ्छाम्यहम्॥2
शास्त्राणां परिरक्षणं सुविशदं ह्याभारतं सर्वदा।
कक्षा: सन्तु सदा प्रभावभरिता ज्ञानप्रदा: शिक्षका:।
वेदाङ्गं पुरतो निधाय सततं गीता च रामायणम्।
भव्यं भारतमस्तु भो शिव! वयं सम्प्रार्थयामोऽधुना॥3
व्यापारे कृषिकर्मणि ह्यनुदिनं स्वास्थ्यं सदाग्रे नयन्।
लोकोऽयं पुरतो निधाय निजतां लग्नो भवेत् सर्वदा।
नैरुज्यं समवाप्य येन सुजना: भक्ता: सुशक्ता: दृढा:।
एषा हे शिव! प्रार्थना स्वमनसा प्रस्तूयते साम्प्रतम्॥4
नीति: शास्त्रसमन्विता सुसरला लोकोपकाराय या।
योगाय प्रवहेन्मुदा न तु सदा भोगाय राज्याय वा।
सेवाभावयुता स्वभावभरिता दम्भादिदोषैर्विना।
राष्ट्रं यातु यथा हि गौरवपदं शम्भो! तथा प्रार्थना॥5

## श्रद्धाञ्जलि:



उद्भटो दर्शने धीमान्, साहित्येऽपि विशारद:।
नव्यव्याकरणे शास्त्रे, वेदे संगणके तथा॥ 1
आभासीयं तरङ्गीयं, पाठनं सुप्रयत्नत:।
संस्कृतस्य प्रतिष्ठार्थं , सर्वदाचरणं मुदा॥2
जन्मोत्सवे प्रसन्नात्मा, विधिना प्रेरित:पिता।
यज्ञं विधाय पुण्यात्मा, कुलदेवं सदा स्मरन्॥3
नाम संस्कारवेलायां, पीयूषो दत्तवान् स्वयम्।
पीयूष:कर्मणा नाम्ना, भक्तिज्ञान समन्वित:॥4
अवशिष्टानि कर्माणि, करणीयानि नित्यश:
विस्मृतं विधिना सद्य:, महत्त्वं नामकर्मण:॥5
पीयूषकान्तो विबुधो वरेण्य:, नैयायिक:संस्कृतकर्मदक्ष:।
श्रुत्वा मनस्थैर्यमवाप्य सद्य:,
देहंपरित्यज्य गतोऽति कष्टम्॥6
अध्यापने शास्त्रविचक्षणोऽसौ
शास्त्रानुकूलो नियमानुरागी।
पितु:प्रतापात् गुरु सेवया च,
मेधामयोऽयं प्रगतो द्युलोकम्॥7
छात्रा: सुयोग्या:सततं सुशीला:।
सम्पाठ्य छात्रा: विहिता: स्वदेशे,
देशे विदेशे निजकर्मदक्षा:।
आध्यात्मिका: सत्यसनातनाश्च, पीयूषनामा गतवान् स लोकात्।8
महत्कष्टं महद्दु:खम्, अकाले यत्समागतम्।
सायुज्यं दीयतामीश! , इत्येषा मम प्रार्थना॥9
दु:खमापतितं यत्र, सोढुं शक्ति: प्रदीयताम्।
त्वमस्य जगत: कर्ता, तस्मात् सम्प्रार्थयाम्यहम्॥10

## मधुमासगीतम्

डॉ सिंहासन पाण्डेय:
देवरियात:

मधुमासि मोदमानकोकिलो
मदविह्वलो रवीति सखि रे।
हा विरहिणां मनोवञ्चकं
पुष्पायुधं स्तवीति सखि रे।
मधुमासि................।1।

हन्त! मलयानिलो वह्निगर्भायित:
आम्रनवकोरको लौहसारायित:।
गुञ्जितं मधुलिहां सन्ततं
तापकं बोभवीति सखि रे ।
मधुमासि................।2।

फुल्लकह्लार किंशुकश्रियो वैभवम्
नैव वितनोति हृदि भव्यताया लवम्
का कथा भानुभासोऽधुना
कौमुदी दोदवीति सखि रे॥
मधुमासि................।3।

वल्लभे च प्रवासं गते विप्रियं
वस्तुजातं समग्रं न चुम्बति धियम्
किञ्च कुर्वीत तन्वी रह:
तन्मनो रोधवीति सखि रे।
मधुमासि मोदमानकोकिलो
मदविह्वलो रवीति सखि रे।

हा विरहिणां मनोवञ्चकं
पुष्पायुधं स्तवीति सखि रे।4।

# पतंजलि विश्वविद्यालये दर्शन, संस्कृत इत्यनयोः विभागयोः संयुक्ततत्वावधाने आयोजिता त्रिदिवसीय कार्यशाला

हरिद्वारम्। पतंजलि विश्वविद्यालये मानविकीप्राच्यविद्या संकायान्तर्गतस्य दर्शनसंस्कृतविभागस्य संयुक्त तत्वावधाने "Sanskrit Computational linguistics" विषये आयोजितकार्यशालाया







शुभारम्भे आचार्य बालकृष्णः, कुलपतिः पतंजलिविश्वविद्यालयः प्रोक्तवान् यत् पतंजलिविश्वविद्यालयः प्राचीनताम् आधुनिकतां च एकसार्धं समानीय नवीन प्रतिमानं स्थापयति यदन्तर्गतं न केवलं नूतनम् अनुसंधान सम्मिलितम् अपितु प्राचीनान् दुर्लभान् ग्रंथानपि कम्प्यूटर भाषया सरलान्, पाठ्यान् संकलितांश्च कुरुते। कुलाधिपतिः पूज्यस्वामी रामदेवः कथितवान् यत् आगामीसमये प्राचीन शिक्षा प्रणाल्या सह आधुनिक वैज्ञानिक संसाध नानां महती आवश्यकता वर्तिष्यते । अष्टाध्यायी इव प्राचीन प्रामाणिक व्याकरण शास्त्रं कम्प्यूटर माध्यमेन कथं ज्ञायेत इत्यस्मिन् विषये स्वामिना स्वीयो व्यापकः दृष्टिकोणः समुपस्थापितः। कर्नाटक संस्कृत विश्वविद्यालयतः शंकराचार्यविश्वविद्यालयतश्च, आगतैर्विद्वद्भिः सर्वेभ्यो विद्यार्थिभ्यः कम्प्यूटर कार्यशालायां प्रायोगिकसूचनाः प्रदत्ताः। क्रमेस्मिन् स्ट्रक्चर ऑफ लेग्वेंज इतिविषये प्रोफेसर शिवानी, मोर्फोलॉजी पर डॉ. स्वाति बासापुरः, इन्पुट मैथड्स फॉर इंडियन लैंग्वेज सिद्धान्त एवं च प्रयोग, टैगिंग-टैक्स्ट्स विषये आचार्य चौतन्यः एवं आचार्यः नवीन के. कौशिकः, कोश-प्रैक्टिकल डेटाबेस इत्यत्र प्रो शिवजा एवं च विदुषी अरूणा विस्तृतं च प्रत्यपादयन्। कार्यक्रमस्य अध्यक्षतां विश्वविद्यालयस्य मानविकी संकायाध्यक्षा साध्वी आचार्या देवप्रिया अकरोत्। तेन स्वसम्बोध ने विद्यार्थिभ्यः कम्प्यूटर भाषा ज्ञानेन समं मूल ग्रंथान् गहनतया अध्येतुं बलं दत्तम्। कार्यशालायां दर्शन संस्कृत इतिविभागयोः समस्तः प्राध्यापक गणः, शोधार्थिनः विद्यार्थिनश्च भागमगृह्णन्।

## अलङ्कारशास्त्रविमर्शः इति विषयिका राष्ट्रीयकार्यशालायाः समापनं जातम्

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य विशिष्टसंस्कृतविभागेनायोजिताष्ट दिवसीया 'अलङ्कारशास्त्रविमर्शः'




इति विषयिका राष्ट्रीयकार्यशालायाः समापनं 16-03-2024 तमे दिनाङ्के पूर्वाह्णे 11:00 वादने सञ्जातम् । आदौ दीपप्रज्वलन - वैदिकमंगलाचरण - कुलगानञ्च अभवत् । मुख्यातिथिरुपेण समागतः कालिदाससंस्कृत- अकादमी, इत्यस्य निदेशकः डॉ.गोविन्दगन्धेमहोदयः उक्तवान् यत् काव्यगतसौन्दर्यवृद्धिकारकमेव अलङ्कारः कथ्यते । वस्तुतः वर्णनशैली एव अलङ्कारः भवति । यतोहि अनेन अलङ्कार संख्यायां वृद्धिरपि भवति। एवमेव हि अलङ्कारशास्त्रस्य विभिन्नविषयानामध्ययनस्य आवश्यकता विद्यते। शास्त्रचिन्तनेनैव शास्त्रसंरक्षणं भवितुं शक्यते। सारस्वतातिथिरुपेण समागता डॉ. वन्दनात्रिपाठीमहोदया सेवानिवृत्ता, आचार्या, शासकीय कन्यामहाविद्यालयः, उज्जयिनी अनयापि कथितं यत् शब्दार्थयुक्त्या, प्रभावी रोचकतापूर्ण, काव्यशोभा वर्णनमेवावलङ्कारः। सभाध्यक्षीयोद्बोधने मान्यः कुलपतिः प्रो.विजयकुमारसीजी वर्यः उक्तवान् यत् भारतीयकाव्यशास्त्रस्य तात्पर्यं सस्कृतकाव्यशास्त्रमेवास्ति। अन्यभारतीयभाषासु संस्कृतस्य मूलसिद्धान्तमेव स्वीकृतमस्ति। विभिन्नैः सम्प्रदायसंस्थापकाचार्यैः भारतीयसंस्कृतकाव्य-साहित्यस्य विभिन्नावयवव्याख्या कृतास्ति । कार्यक्रमस्य संयोजिका डॉ.पूजा उपाध्यायामहोदयया प्रतिवेदनपत्रं प्रस्तुतम्। सञ्चालनम् आभारञ्च सुश्रीपूजागौर कृतवती।

## शास्त्रार्थमाध्यमेनैव भारतीयज्ञानपरम्परा संरक्षिताऽस्ति - आचार्यः हरेरामः त्रिपाठी

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालये




नवदेहलीस्थकेन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनान्तर्गत राष्ट्रियशास्त्रार्थकौशलप्रशिक्षण विषयिका कार्यशालायाः समारम्भः विश्वविद्यालयस्य योगेश्वरश्रीकृष्णभवने अभवत्। कविकुलगुरूकालिकाससंस्कृत विश्वविद्यालयस्य कुलपतिः आचार्यः हरेरामत्रिपाठीमहोदय : मुख्यातिथिरूपेण समागत्य स्वकीय सम्बोधने उक्तवान् यत् एवमेवातिप्राचीनकालतः प्रश्नोत्तरमाध्यमेन शास्त्रविधिना शास्त्रसंरक्षणं भारते संरक्षितं वर्तते। येनाद्य अस्माकं ज्ञानपरम्परा समृद्धा विद्यते । सभाध्यक्षीयोद्बोधने कुलपतिः आचार्यः विजयकुमारसीजी महोदयः कथितवान् महाराज्ञः विक्रमस्य नवरत्नरूपेण नानाशास्त्रपण्डिताः अत्रैव अभूवन् एते विश्वप्रसिद्धाः आसन्। सारस्वतातिथिः आचार्यः श्यामदेवमिश्रमहाभागः न्यायवेदव्याकरणज्योतिषादि शास्त्राणां महत्त्वं प्रतिपादितवान् । संयोजकः परियोजनान्वेषकः डॉ. तुलसीदासपरोहा वाचिकस्वागतं कृत्वा प्रस्तावना प्रस्तुतीकरणपूर्वकं सविस्तरेण शास्त्रार्थपरम्परा तथा संप्रति एतस्यावश्यकताऽपि प्रतिपादितवान्। संचालनञ्च प्राध्यापकः डॉ. गंगाशरणव्यासः कृतवान् । कुलसचिवः डॉ.दिलीप सोनीमहोदयेन धन्यवादज्ञापनं कृतम्।

## मैत्री

चतुर्थपुटस्य शेषभागः

तृतीया अनिवार्यता कस्यास्ति? चिकित्सालयस्य चिकित्सालयस्य चतुथी आवश्यकता कस्यानुमीयते? मार्गस्य मार्गस्य मार्गस्य। सर्वमपि पृष्ठे महानिदेशकः आकर्णयन् प्रसन्नतामनुभवत् अग्रे आगत्य मंच आहूते सति प्रोवाच-अयिः ऐतिहासिकस्य क्षेत्रस्य वास्तव्याः। सुखमनुभवामि, यदस्मिन् काले अतुलसमानो नेता युष्माभिरवाप्तो वर्तते। अयं क्षेत्रस्य




समुद्धार विधास्यतीति जाने। किन्तु अस्मिन् ग्रामे मद्यपायिनो न भवेयुरेतदर्थं मद्यविक्रयनिषेधो विधेयः। प्रतिग्रामं पुस्तकालयः स्थापनीयः। न वैरं स्थापनीयम्। सर्वा जातयः सर्वे धर्मानुगामिनः स्वं स्वं धर्ममार्गमारूढाः सुखेन देशसेवां मनसि निधाय निजगृहं शिक्षितं कुर्वन्तु । इत्येव मेऽभिलाषोऽस्ति। इत्युक्त्वा अतुलाय वर्धापनं प्रदाय ग्रामीणेभ्यः शुभकामना ददानो विरराम।

अग्निमदिवसादेव सुगन्धातुलमार्गनिर्देशने सर्वो जनः एकहोरा यावद् ग्रामविकासाय श्रमं कर्तुं लग्नः पश्यतामेव सर्व ग्रामाः स्वच्छाः संजाताः, शौचालयाः निर्मिताः, जलसमस्या निर्गता, विद्यालयाः स्थापिताः, चिकित्सालय आनीतः, मनोहरः पुस्तकालयः स्वयमेव ग्रामीणैः सोल्लासं संस्थापितः, यत्र सत्साहित्यं पठितुमायान्ति सर्वे यथासमयम्। प्रधानमन्त्रिस्वच्छपुरस्कारयोजनायामस्य नामापि घोषितं भविष्यतीवेति कथयन्ति सर्वे। किन्तु अतुलस्य सुगन्धायाश्च नेतृत्व बहु शोभनं बहु शोभनमिति सर्वत्र निनादः श्रूयते।

अयं पक्षपातरहितः सर्वधर्मकल्याणाय सर्वजनहितभावनया नेतृत्वं कुरुते। यमनुकुर्वन्ति अपरे दूरस्था अपि। जना अपि विहाय निजधर्म निजसम्प्रदायं परस्परं मैत्रीभावनया जीवन्ति, न कश्चिच्चौरो लभ्यते। सर्वे अतुलमार्गानुगामिनः परिश्रमशीला समभवन्। इयमेव मैत्री प्रसरन्ती देशभावनां द्रढीकरिष्यतीति। परन्तु कन्याभ्रूणहत्या अस्मिन् ग्रामे श्रूयत इति ज्ञात्वा सुगन्धा कलंकमिममपाछालयितुं संकल्पमगृह्णात्। साचिन्तयत् क्षेत्रमिदं कथं कन्यारक्षां कर्तुं कन्यां पाठयितुं यत्नशीलं स्यादिति अस्माभिर्बोद्धव्यमस्ति। अतो ब्रवीमि...

कन्यकाः पूजनीयाः स्युः देशे देशान्तरे सदा।
रक्षणीया इमा सर्वाः लक्ष्मीरूपधराः शुभाः।।

।। इति ।।


## पाठकानां कृते सूचना

कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्

**Sanskrit samvad,**

Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249

# प्रदेशस्य समस्तजनपदेषु संस्कृतं प्रसारयितुं नव दिवसीयम् आवासीय प्रशिक्षणम् - विनयश्रीवास्तवः

लखनऊ - उत्तर प्रदेश संस्कृत संस्थानम् लखनऊ द्वारा प्रतिगृहं संस्कृतस्य प्रचाराय प्रसाराय व्यवहाराय च संचालित प्रशिक्षणस्य शुभारंभ सत्रे मुख्यातिथिरूपेण डॉ चंद्रकांत दत्त शुक्लः स्वविचारैः प्रशिक्षु शिक्षकाणां मार्गदर्शनं कृतवान् । मुख्यवक्ता प्रो रामसुमेरयादवः 'समाजस्य हितं संस्कृते निहितम्' इति विषये ओजस्वी विचारान् व्यक्तीकृतवान् ।



निदेशकः विनय श्रीवास्तवः कथितवान् यत् प्रदेशस्य समस्तजनपदेषु केन्द्राणां संचालनं भवेत् तदर्थं प्रशिक्षणमिदं आयोजितम्। प्रशिक्षण संयोजकः डॉ जगदानन्द झा (प्रशासनिक अधिकारी) समग्रं संयोजनं निरवहत्। निदेशक विनय श्रीवास्तवः दीपं प्रज्वाल्य समागत अतिथिभिः सहितान् प्रशिक्षण प्रमुख सुधिष्ठ मिश्रः, भाषाविद् विमलेश मिश्रः, समन्वयकौ दिव्यरंजनः, राधाशर्मा, प्रशिक्षकाः धनंजयमिश्रः, डॉ श्वेता वरणवालः सचिन शर्मा डॉ स्तुति गोस्वामी इत्येषां माल्यार्पणेन अंगवस्त्रेण च स्वागतं व्याहरत् । प्रशिक्षण प्रमुखः सुधिष्ठ मिश्रः प्रास्ताविककथनं प्रशिक्षणस्य वैशिष्ठ्यं च प्रतिपादितवान् । वरिष्ठ प्रशासनिक अधिकारी डॉ दिनेश मिश्रः समागतेभ्यः कार्तज्ञं ज्ञापितवान्। सत्र संचालनं प्रशिक्षिका डॉ श्वेता वरणवालः, डॉ अरविन्द कुमार तिवारी द्वारा विरचितायाः संस्थान गीतिकायाः वाचनं डॉ स्तुति गोस्वामी, स्वागत भाषणं गृहे गृहे संस्कृत योजना समन्वयकः डॉ अनिल गौतमोऽकरोत्। समन्वयकौ दिव्यरंजन राधा शर्माणौ योजनायाः इतिवृत्तं संख्यात्मकविवरणं च उपस्थापितवन्तौ।

प्रशिक्षक धनंजयमिश्रः सचिन शर्मा च प्रशिक्षुभ्यः परिचयात्मक सत्रं संचालितवन्तौ । अवसरेस्मिन् तत्तज्जनपदानां प्रशिक्षु शिक्षकाः, संस्थानस्य पदाधिकारिणः कर्मचारिणः , सामाजिक जनाश्च समुपस्थिताः आसन्।

प्रथमपुटस्य शेषभागः **'भारत की आवाज-आचार्यरमाकान्तशुक्ल'....**

व्यमोहयत्। तदनु मुख्यातिथिना आचार्येण राधावल्लभत्रिपाठिना चलचित्रं भूयो भूयः प्रशंसितम्। तेन एतादृश-चलचित्राणां निर्माणस्यावश्यकता प्रतिपादिता। तेन आचार्यरमाकान्तशुक्लेन सह स्वसम्बन्धा अपि चर्चिताः संस्मरणानि च




श्रावितानि। अध्यक्षरूपेण समुपस्थितेन दिल्लीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेण आचार्येण ओमनाथबिमलीवर्येण आचार्यरमाकान्तशुक्लकाव्यसमीक्षण-पुरस्सरं चलचित्रं प्रशंसितम् । निर्देशिकायै प्रस्तोत्रे निर्मात्रे च वर्धापनानि दत्तानि। अन्ते आचार्येण उमाकान्तशुक्लेन कृतज्ञताप्रकाशनपूर्वकमुक्तं यद् एतादृशचलचित्रनिर्माणं संस्कृतलोकोपकारि। एतदनु श्रीनिवाससंस्कृतविद्यापीठच्छात्रैः श्रीरमेशरेग्मीसंरक्षणे शान्तिपाठः कृतः। कार्यक्रमस्य संचालनं डॉ. अनुरागसिंहेन श्यामाप्रसादमुखर्जीमहिलामहाविद्यालयीयहिन्दीविभागाचार्येण कृतम्। एतदवसरे संस्कृतकवयोऽप्युपस्थिताः अभूवन्। येषु श्रीभारतेन्दुपाण्डेयः, श्रीभागीरथीनन्दः, श्रीमान् अभयकुमारश्चेत्याद्याः अन्तर्भवन्ति। नैकैः आचार्यैः विद्वद्भिः छात्रैः नैकाभिश्च विदुषीभिः प्रेक्षागृहं समाकुलमदृश्यत। अत्रावसरे देववाणीपरिषदः पुस्तकानामपि प्रदर्शनं कृतमासीत् ।।









अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।